लेख्यमेषादिराशिमार्गतः प्रभवाद्यब्दमे
कैकंषष्टिःपंचपवर्तनैः ३ एवंराशौस्थितं
यत्रवत्सरंवर्तमानजं तद्राशिस्थंफलंवी
क्ष्यंयत्किंचिद्वार्षिकंमतं ४ चैत्र्यांप्रतिप
दुक्लातस्याःकालेप्रवेशजे एतद्विलोकये
च्चक्रंकालज्ञानविनिश्चये ५ तत्रसर्वग्रहा
न्यस्याराशौयेयत्रसंस्थिताः वर्षराशेर्वि
त्त्यास्तेरेखास्थानगताग्रहाः ६ उपर
यगताःक्रूराःसौम्याश्छिद्रांत्यवर्जिताः ग्रहा
रेखाग्रदाज्ञेयामित्रमध्यगृहेस्थिताः ७
स्वर्क्षेद्विघ्नंफलंदत्तेसौचेत्रिघ्नंतथैवच
फलार्धंशत्रुगेहस्थेनीचस्थेनिष्फलोग्रहः
८ एवंरेखाप्रमाणेनवर्षविंशोपकाम
माः ज्ञातव्यादेशिकेंद्रेणवर्षेवर्षेप्रयत्नतः
९ एवंवर्षफलंप्रोक्तंचैत्रमासाच्चवासरा
त् आषाढेकार्तिकेप्येवंजलंधान्यंविचि

तयेत् तत्रदेशेपुरेग्रामेफलंभिन्नंप्रदृश्य
ते तस्मान्नत्कारणंवक्ष्मियेनजानंतिसा
धका ११ देशगदिराशिनाथस्ययोरेखादा
यकोग्रहः मित्रोदासीनशत्रुवेफलंभि
न्नंकरोतिसः १२ मित्रोद्दिग्नंफलंदत्तेस
मःसाम्यंकरोतिसः न्नत्रुःसर्वहरोज्ञेयः
सर्वदाकालचिंतकैः ९२ एवंविचार्यव
र्त्तव्याकालक्रियोपकाबुधैः यथाजलंय
थाधान्यंस्वस्वकालेविचिंतयेत् ९४ इ
तिस्वरोदयेसंवत्सरचक्रं ॥ स्थानच
क्रंप्रवक्ष्यामियदुक्तंलंपटागमे येनवि
ज्ञायतेसम्यक्स्थानेस्थानेशुभाशुभं १
स्थानपीडाप्रभावेनराज्ञःपीडाप्रजाय

संवत्सरचक्रं

ते तस्मादपीडितेस्थानेस्थानंसर्वदा
बुधैः २ स्थाननामोऽवंराशिंकृत्वादद्या
दशारके राशिमंडलकंन्यस्यवाममार्गेण
संस्थितं ३ नवतत्रग्रहाःस्थाप्याःमास
वंइस्वराशिग तेषांविलोकनंवीक्ष्यंस्था
नराशिगतंयथा ४ तृतीयैकादशेपादं ॥११
द्वपादेद्यूनबंधुगे १०।४॥त्रिकोणेत्र्य८५
धिमृत्युस्थे त्यस्ते १७ पूर्णंपश्यंतिरविच
राः ५ शन्यर्कराहुकेत्वाराः पंचक्रूरग्र
हामताः शेषंचतुष्टयंसौम्यंमासेदुश्चौ
पिपंचमः ६ एवंपंचग्रहाःक्रूराःपंचसौ
म्यास्तथैवच तेषां
शुभाशुभांदृष्टिंकृ
त्वास्थानबलंवदेत्
७ एकैकग्रहजादृ
ष्टिःपूर्णापादचतु
ष्टयं पंचमेनव
मेतेषांपादोना
विंशतिर्भवेत् ८ तत्रविशेषकाज्ञेयाः
सौम्यक्रूरग्रहाऽऽढ्याः एवंप्रसाधयेद्दृष्टियु
ग्मरेवैटैःशुभाशुभं ९ वक्ष्मीस्तोकोनितां
त्रोपाज्ञायतेदृक्शुभाशुभा तेचविंशोप
कास्तस्यस्थानस्यबलनिर्णये १० एवंदे

स्व ६२ शेपुरेत्रामेबलंयत्रशुभाशुभं तत्रस्थाने स्थितोराजादुष्टरिष्टैर्नपीड्यते ११ स्थान बलप्रभावेणस्वबलस्यबलोदयः शत्रु सैन्यंक्षयंयातियावत्स्थानेशुभेस्थितः १२ इतिश्रीस्वरोदयेस्थानबलचक्रम् मीनमेषोदयेचंद्रःसततंदक्षिणोन्नतः षडगुन्नतःशेषेस्यात्समरूक्षषडंभयोः १ विडूरंस्यात्समेचंद्रेदुर्भिक्षंदक्षिणोन्नते इतिरोगभयंशूलेसुभिक्षंवोत्तरोन्नते २ इतिशृंगोन्नतिचक्रं एतानिसर्वचक्राणिज्ञात्वायुद्धंसमारभेत् जयेदि

हनसंदेहशत्रुतुल्येपिवैरिणि ३ इति चक्राध्यायेचतुरशीतिचक्राणिसमाप्तानि ८४ चंद्रावस्थास्वरूपस्वरबलविमलदेहतत्वप्रधानंराशेर्भेवेधद्वेग्रहवशफदंस्थायिद्यायिप्रधानं वर्गाद्यैश्चवर्णैर्बलविधिसहितंमातरकामेदरम्यंभूपादीनांजयार्थंनरपतिरकशेचक्रबंधप्रबंधं ४ इतिश्रीनरपतिजयचर्य्यायांयामलीयस्वरोदयेचक्रबंधाध्यस्त

तीयोध्यायः समाप्तिमगमत् ४ अथातःसंप्रवक्ष्यामिभूबलानेसमासतः चतुर्विधेपिसंग्रामेयेनस्याद्विजयीनृपः १ चैत्राद्याईशवायव्येरक्षोनीडधनाधिपे वारुण्यांरक्षिणोरुद्वासुरक्षस्तथानले २ ॐ इभूमिरितिख्याताप्रोक्तायाब्रह्मयामले चतुर्विधेपिसंग्रामेजयदाषष्ठदक्षिणे ३ इतियामलेॐइभूमिः॥ ॥



वायुरुज्ञाग्निनैर्ऋत्ययाम्येतायोतरधैऋ अग्निरज्ञानिलेरक्षेचैत्राद्यैभ्रमणंभवेत् १ एवंमासोदयायत्रतत्रस्थाःषष्ठदक्षिणे इयंजालंधरीभूमिःसंग्रामेजयदाभवेत् २ इतिजालंधरीभूमिः पूर्णा



रव्याकथयिष्यामिपूर्णपीठाद्विनिर्गतां इंद्रयुद्धेथवासुद्धेगेयामार्ध्वमुखीरत्र

च पूर्वोत्तरेयमेशकोणयांतकोत्तरजलेय
यथादिनेतथारात्रौषष्ठदक्षिणगोजयेत् २
इतियामलेपूर्णभूमिः
इदंयमेजलेसौम्येमेषा
दिभ्रमणत्रयं रविसं
क्रांतितोमासाज्ञातव्य
यत्रसंस्थिताः तत्स्था
नाभ्रमणंसव्यंचतुर्णां
दिगष्टके षष्ठदक्षिणगा युद्धेझामारव्या
रिक्षयंकरी २ इतियामलेकामाख्याभू
मिः शक्रोत्तरेजलेयाम्येचैत्रादीभ्रमण
त्रयं मासोदयगतायत्रतस्मिंश्चधटि
कांक्रमः १ तत्रादिनाडिकाभुक्तिरुदय
श्चपुनःपुनः इयंकोलापुरीभूमिः षष्ठ
दक्षिणगाभुभा २
इतिस्वरोदयेकोला
पुरीभूमिः इदंजला
ग्निसौम्येचनैर्ऋत्यें
शानिलेयमे ईशेवा
पावकेसौम्येचैत्रादि
भ्रमणंभवेत् १ ए
कवीरामहाभूमिः प्रोक्ताचार्योदियामळे

षष्ठदक्षिणगायुद्धेजयदानात्रसंशयः २
इतियामलेएकवीराभूमिः चैत्रादिचतु
र्वतोवामभ्रमन्काष्ठा
चतुष्टये मिलंध्यारव्या
मरुद्भूमिर्जयदाषष्ठ
दक्षिणे २ इतिमिलं
ध्रीभूमिः चक्रेद्वादशपत्रारेखमेषाद्या

वाममार्गगाः यत्रस्था
नंततःस्थाप्यंभुक्तिः
साधैकघटीद्वयं १ महा
मारीसमाख्याताभू
बलानाबलोत्कटा
समरेजयदाप्रोक्ताष
ष्ठदक्षिणासंस्थिता २ इतियामलेमरु
मारीभूमिः विलोमाःपूर्वतोमासाश्चैत्रा
दिकूचतुष्टये प्रहराःसव्यमार्गेण
मासस्थानादिगण्यते १ चातुरंगेक
वीकोटेजयदाषष्ठदक्षिणे क्षेत्रपाली

क्षेत्रपाल्यां वक्रबलानि लभ्यते नोयुद्धं क्षेत्रपालीक्षेत्रेनैवयोद्धव्यमिति
हस्तक्षेत्रपालीरुद्रभक्तृतीयप्रहरेपश्चिमायामेकवामवतः चतुर्थप्रहरे

स्व ६४

महाभूमिर्भबलानांबलोत्तमा २ यैर्द्वेलाद्व
लयुक्तानिभबलान्यपराणिहि एतद्बलेनर
हितादृथायतुरथीतयः ३ इतियामले
क्षेत्रपालीभूमिः पावकेसौम्यनैर्ऋत्य

प्रहर १	चैत्र श्रावण मार्ग	प्रहर १
वैशाख भाद्रपद पौष	क्षेत्रपा लीभूमिः	आषा ढ कार्तिक फाल्गुन
प्रहर १	ज्येष्ठ आश्विन माघ	प्रहर १

इंद्रवायुयमोद्वरे जलाग्न्युत्तरनैर्ऋत्येपूर्व
चैत्रादिमासतः १ वंशजेयंमहाभूमिरितिवंशा
रक्षेष्टगतायुद्धेजय दानात्रसंशयः इति
यामलेवंशजाभूमिः

आश्वि आषाढ पुष्य फाल्गुन	आषाढ फाल्गुन	चैत्र मार्गः
वैशाख पौष	वंशजा भूमिः	भाद्रपदः
श्रावणः	कार्तिकः	ज्येष्ठ माधः

ज्ञानवानोवधार्थायरुद्रोरुद्रेणचिंतितः तं
रुद्रंवप्रवक्ष्यामिजयायविजयार्थिनां १
दशदोर्द्वेपंचास्यंत्रिनेत्रंचजटाधरं महा
प्रेतासनारूढंत्रिशूलायुधधारिणं २ इंद्रेवायौयमेरौद्रेवारु
णेग्नौकुबेरेसौम्येचैत्र
मासाद्ययंक्रमः ३ दिनेदिनार्धयामंचप्रहरं

१ चैत्रादिमासेषुदिनभेवभुक्तिः।आषाढादिषुमासेषुदिनार्धभुक्तिः।आश्विनादिषुत्रिषुप्रहरेभुक्तिः।पौषादिषुत्रिषुमासेषुप्रहरार्धभुक्तिः।इतिकेषांचिन्मतम्। अन्येपुनरेवमाहुः प्रतिमासंस्थूलसूक्ष्मक्रमेणदिनदिनार्धप्रहरप्रहरार्धरूपाभुक्तिः।तत्रावश्यकत्वेसूक्ष्मभुक्तिराश्रयणीया। सति संभवेस्थूलापातिव्यवहारः कार्यः १

MEMORIAL

प्रहरार्धतदग्रतः एवंभुक्तिप्रमाणेनदृष्ट्वा
क्षिणेनजयी ४ इतिबृहद्यामलीयरुद्रोदये

आषाढ	चैत्र मार्ग	भाद्रपद ज्येष्ठ
आश्विन फाल्गुन	रुद्रा भूमिः	ज्येष्ठ पौष
वैशाख	श्रावण	कार्तिक:
वैशाख	माध	

साध्यारुद्राभूमिः
सप्तरेखांकितेचक्रे
रुद्रादोमासभादितः
सव्यमार्गेणितेदेया
अष्टाविंशतिसंख्यया
मासर्क्षदिनभंज्ञात्वा
तस्मात्तात्कालिकंचभं रेखायासुद्ध्याशुद्धिंकुर्यात्सपादधटिकाद्वयं २ मासर्क्षमासनामर्क्षदिनेदो



चैत्रमासइत्यत्रचैत्रप्रवृत्तिनिमित्तंचित्रानक्षत्रंमासास्मिन्पूर्णमासीतिसंज्ञायामित्यनुशासनबलात् एवंवैशाखइत्यत्रविशाखारूपप्रवृत्तिनिमित्तं। तदेवमासमासग्रहनक्षत्रमुच्यते।प्रातस्तिकंदिनभंनक्षत्रं।इष्टनाड्याद्यतोद्वितीयेस्थितिनात्कालिकंनक्षत्रंज्ञेयं १ ७

उदाहरणं। चैत्रमासेचित्रानक्षत्रंदृश्यतेनदृश्यतेवाऽतस्त्र्यादिरेखामारभ्यलेख्यं।ज्येष्ठेऽप्येवमेवद्वयमध्येपि।चैत्रमासस्यादिनानक्षत्रंशानेदत्तं।चित्रातःपंचदशनक्षत्रेरेवमासारंभः।एवंनेनमासबंदरवीजातौ।आषाढेरेवाप्रारूढचंद्रः।पश्चिमाषाढेरेवार्कोमर्कः।पुनर्यदिदिनस्तिकानक्षत्रंसाकृत्तिकापश्चिमेचतुर्थनाड्यामस्ति।कृत्तिकायाःपंचदशघटिन्यूनाधामाघवेरिनाड्यांरविः।पश्चिमेदिननाड्यांचतुर्थनाड्यांदिनेऽहः।युद्धसमयेस्त्र्यादिघटिकागनक्षत्रंकृत्तिकायाश्चतुर्थनक्षत्रंभुक्तं।पंचमेपुनर्वसौतत्कालेऽहः।७ उत्तरभा

दोरेखायांतत्कालेऽहः भास्त्रेदशक्षेदक्षिणाधरेखायांमुत्तराषाढेना
त्कालिकोर्कः। अत्रपूर्वोत्तररेखयोःस्वसैन्यस्यजयः दक्षिणापश्चिम
स्थदक्षिणपश्चिमसैन्यस्यपराजयः। अत्रकालरेखापुष्या
आग्नेयवायव्योसंलग्नास्तिर्यांनलंघयेत्। पश्चिमदक्षिणस्थ
सैन्यंपूर्वोत्तरे। पूर्वोत्तरस्थंदक्षिणेपश्चिमेनगछेत्

मासवंद्रोतनदशोत्रिपंचर्क्षः पंचदशसंख्याकनक्षत्रोवस्थि
तेमासेभानुर्ज्ञेयः। एवंदिनेभानुर्घटीसानुज्ञेयः ४
कपाटंपूर्वतोज्ञेयंकार्तिकादित्रिकंत्रिकं। तथानमस्यतोर्कस्यकालो
मधोरेकेनकंटकं। यात्रामारुद्रः। युरुमान्वोर्नसेत्राच्यांनिदो
श्रुक्रेचदक्षिणे। कालरुद्रः कुजेप्रत्यक्षउत्तरेबुधमंदयोः

कामोमा पो	माघाफाल्गु वै	केज्ये•आ	श्रावाभा	कृपाट
ज्येष्ठ•आषाढ। श्रा	भाद्रपद। आश्वि कार्तिक	मार्गशी: पौष माघ:	फाल्गुन: चैत्र: वैशा	कालः
चैत्रः श्रावः मार्गः	वैशा•भाद्रपो ष:	ज्येष्ठ मा आश्वि धः	आषाढ कार्ति•फा	कंटक:
पूर्व	दक्षिणा	पश्चिम	उत्तर	

र्दिनभंतथा नाडिकाभ्रमणंघत्रतत्रतत्का
लसंज्ञकः ३ मासेंदोर्मासभानुस्यादिनें
दोर्दिनभास्करः घटिकेंदोर्घटीभानुश्चि
पंचर्क्षःसदाभवेत् ४ दक्षदृष्टेरविंक्रुर्या
द्राममार्गेनिशाकरं जयेदिहनसंदेहए
कोपिशत्रमाहवे ५ शक्तिरूपेस्थितःश्वं
द्रःकालरूपीदिवाकरः चंद्रसूर्यौनिरालेख्य
कालरेखाविधीयते ६ कवोकोटेतथा
ष्टंद्वे चतुरंगेमहाहवे लंघनीयानसायो
धैःकालरेखार्कसंमुखी ७ इतिस्वरोद
येकाकानलीभ्रमिः ८ पावकाद्वादशारे

चघटीपंचकमोदयः उदयाद्वाममार्गेण
भ्रमोज्ञयोनिरामये १ यत्रोदयंगतामू
मिःसाकार्याघृष्टदक्षिणे ततोजयमवा

प्नोतिसंग्रामेपि चतुर्विधे २ इ
तियामलेनिराम याभूमिः ४ व
ज्रन्यादिकोणगा वामामासायामा
रुक्तसव्यगाः द
क्षदृष्टस्थितामुद्वेजयदाजयलक्ष्मिका १

वैशाख भाद्रपद पौष:७	प्र८	चैत्रःश्रावण:मार्गः	इतिश्रीयामलेजयल
प्र६	ज्यष्ठ उक्षी:	प्र २	क्ष्मिकाभूमिः ४ वा
ज्यष्ठ आश्विन माघ५	त्रह ८	आषाढ कार्तिक फाल्गुन३	रुणाद्वामगामासा
२८	ज्यष्ठ आश्विन माघः	१८	श्चैत्रादिदिक्चतुष्टये
आषाढ कार्तिक फाल्गुन	महाल क्ष्मीरः	वैशाख भाद्रपद पौषः	उदयस्तेनमार्गेणप्र
३२	चैत्रः श्रावणः मार्गः	८	हसार्धंदिनाहके१म

हालक्ष्मीरियंख्याता
यथोक्ताब्रह्मयामले
दक्षदृष्टगतामुद्वेज
स्यसंग्रामविधते२
इतिस्वरोदयेमहाले
क्ष्मिकाभूमिः ४ अपसव्यगतामासा

:पूर्वादिदिक्चतुष्टये दक्षदृष्टेजयोयुद्धेजय
भूमिरियंमता १ इतियामलेजयाभूमिः

	चैत्रः श्रावण मार्गः	
वैशाख भाद्रपदः बोधः	जया भूमिः	आषाढ कार्तिकः फाल्गुन
	ज्येष्ठ आश्विन माघ	

१६

इंद्रेवह्निजलेसौम्ये
नैर्ऋत्येंद्वयमीत्तरे
रुद्रवातांतकेरुद्रे चै
त्रमासाद्ययंक्रमः १
एषासाविजयाभूमिः
युद्धेदक्षिणभागगा
जयदानात्रसंदेहश्चातुरंगमहाहवे २ इ
तियामलेविजयाभूमिः षट्कोणमालिखे
च्चक्रं पूर्वापरसमन्वितं षट्कंकर्वादिकंप्रा
च्यांमकराद्यंचपश्चिमे १ एवंवह्निवायु
रुद्रेचनैर्ऋत्येवरुणालये घटीपंचप्रमा
णेमकर्कादीभ्रमणंभवेत् २ तोयवाताग्नि

मार्गशी फाल्गु	चैत्रः भाद्रपदः	वैशाख
आषाढ कार्तिकः	विजया भूमिः	आश्विनः माघः
बोधः	ज्येष्ठ	श्रावण

१८

नैर्ऋत्येश्रृंखलिनीदिशिक्रमात् भ्रमोमृगा
दिकेषट्के प्रोक्तेषाभूमिर्भैरवी ३ जय
दादक्षिणेभागेमृत्युदावामभागके स

मुखेभंगदायुद्धे षष्ठस्थासंधिकारिका ४
इतियामलेभैरवीभूमिः यत्रोदयगताबा
लाविशेषात्सुतो
रणेत्रस्यंतिशत्रु
संघाताःसिंहस्थे
वयथामृगाः १ अ
र्धयामोदयाबाला
संज्ञुरवीजयदाम
ना तदूर्ध्वंवामगा

८	४	३२
१२	बालाभूमिः	२८
१६	२०	२४

श्रेष्ठाषष्ठगानिश्चितंभुसा इतियाम
लेबालाभूमिः मेषादिविन्यस्तचक्रं द्वा
दशारमसव्यतः पूर्वोदयतः सव्यभ्र
मः पंचघटीमतः १ इयंयोगीश्वरीभूमिः
जयदाषष्ठदक्षिणे अहोरात्रेणासास

२१

र्वैचक्रंक्रामति
सर्वदा इतिया
मलेयोगेश्वरी-
भूमिः इंद्वनैर्ऋ
त्यसोमाग्नितो
यरुद्रांतकानि
ले घटीद्वयप्रमाणेनदिनार्ध्वभ्रमणी
क्रमात् १ एवमेवापराकूपिचंडीभ्रम
तिसर्वदा यस्यदक्षिणभागयुद्धेतस्यभं

गोनविधते इतिस्वरोदयेचंडीभूमिः उद
यास्तर्वनः सव्येयामेयामेदिगष्टके यामभू
मिस्त्रमत्येवंजयदाष्टछदक्षिणे २ इतियाम

१२	२	८
६	चंडी भूमिः	१८
१६	१०	४

२१

८	प्रहर १	२
७	याम भूमिः	३

२२

४	३२	२८

८	भुंज ङ्गभू मिः	२४
१२	१६	२०

२३

भूमिः इशाग्नेवा
मतोयातियामार्ध
कक्रुवष्टके भुंभु
कारव्याश्वमत्येवंज
यदावामसंमुखी
इतियामलेभुंभुका
भूमिः त्रिरेखाऊ
र्ध्वगाः कृत्वातिर्य
गाश्च तथापुनः
पूर्वरेखादितोन्य
स्याः मेषाद्याःसव्य
मार्गगाः २ यत्रस्था
शोस्थितश्चंद्रस्त
द्वंडक्रमतेरविः र
विःदृष्टेशशीचाग्ने
जयदाकर्तरीस्मृता २
इतिकर्तरीभूमिः
चैत्राद्युत्तरतोमासा
द्वादशारेवस्तृष्टिगाः
यत्रस्था स्तत्रतोया
तिपंचपंचघटीक्रमात् २ भंगदाष्टछगा
प्राक्कामत्युदावामरतस्थिता जयंददाति

यदाद्वयोश्चंद्रसूर्ययोरेकरेखावस्थितिस्तदैषाभूमिर्नान्यथा। वै
तस्याःफलमाह। रविरिति स्पष्टार्थमिदमर्धं

दक्षाग्नेशगर्दूलीसमरेस्थिता २ इतियाम

८	४	३२

१२	सिंहली भूमिः	२८
१६	२०	२४

२६

लेशगर्दूलीभूमिः वा
ममागेणपूर्वादेर्यामा
र्धंवस्तिगष्टके वामग्ने
जयदाप्रोक्तासिंहली
समरेसदा इतिस्व
रोदयेसिंहलीभूमिः
तिथ्यादावुदयंयाति
नाडिकाःषट्प्रमा
णतः पूर्वयाम्योत्त
रसोम्येब्रह्मस्थाने
तथैवच तन्वीभू
मिरियंरव्याताजय
दाष्टछदक्षिणे ब्रह्म
स्थानोदयेमृत्युःसे
न्ययोरुभयोरपि २
इतियामलेतन्वीभू
मिः चैत्राद्याःसर्व

	८		चैत्रश्राव मार्ग		
२४	३०	१२	आषा	महामा	वैशाख
	१८		कार्ति फाल्गु	या भूमिः	भाद्रपद पौषः
				ज्येष्ठ आश्विन माघ	

३ तनुभूमिः

क्षिणगाभ
यामहामा

तोमा
सा:स
यंका
श्चा
नुक्ष्य
ष्टछद

२८ कटकबंध

स्व
६८

यात्वियंमता २ इतिस्वरोदयेमहामा
याभूमिः दक्षिणाचुदयंयोतिचैत्रार्यादिक्
चतुष्टये जयदाष्टदक्षस्थाभूमिरेषामे
श्वरी १ इतियामले
माहेश्वरीभूमि अर्ध
यामेभ्रमत्सव्येशक्र
स्थानादिगष्टके ष
सुस्थाजयदायुद्दे दे
वकोटिरियंमता

	आषाढ कार्तिक फाल्गुन	
ज्येष्ठ आश्वि माघ	माहेश्व रीभूमिः	चैत्र श्रावण मार्ग २९
	वैशाख भाद्र चोष	

३२	४	८
२८	वैवको टिः	१२
२४	२०	१६

१५ १६	१ २	३ ४
१३ १४	शिव भूमि	५ ६
११ १२	९ १०	७ ८

स्यांतुतिथित्रयं

इतियामलेदेककोटि
भूमिः ऐंद्यास्तिथि
युगंशुक्लिःसव्यमार्गे
दिगष्टके दक्षिणेज
यदाप्रोक्ताशिवाभू
मिर्महाहवे १ इति
शिवाभूमिः आदौ
तिथित्रयंरुद्रत्रयंचैव
अलोऽन्त्ये ततश्चैका
यमाशायामग्निभागे
तिथिद्वयं १ वायो
सोम्यतथैकैका पूर्व
नैर्ऋत्येका कृताष्टेश

शुक्लिभूमिर्जयप्रदा २ इतिस्वरोदयेशुक्लिभू
मिः चैत्रादिवायुतोमासाः संहारेणादिग
ष्टके पुनःपश्चिमतःशेषाश्चतुर्दिक्षुक्रमे
णाच १ एषदक्षिणगाश्रेष्ठासंगदाधाम
संमुखी इयंधूम्राभिधाभूमिःसर्वशत्रु
भयंकरी २ इतियामलेधूम्राभूमिः

२ ३	१३ १४	६ ८
२२	शुक्लि भूमिः	७
१०	५ ६	१५
आश्वि न	भाद्र माघ	श्रावण
कार्तिक चोष	धूम्रा भूमिः	आषाढ फाल्गुन
चैत्र	वैशाख मार्ग	ज्येष्ठ
भाद्र पद	वैशाख पोष	चैत्र कार्तिक
ज्येष्ठ	माना भूमिः	श्रावण माघ
आषा ढ	आश्विन फाल्गुन	मार्ग शीर्ष

दक्षिणकोणस्थवायो
यमेरुद्रांबुपावके
नैर्ऋत्येऽयमेतोयेचै
त्रादिभ्रमणंततः ष
ष्ठस्थाजयदानित्यम
न्यत्रैषानशोभना १
इयंमानाद्धयाभूमि
र्युद्धकालेमहाबला १
इतिस्वरोदयेमानाभू
मिः चैत्रादिमासष
ट्कंतु पूर्वभागेकृतोद
या शेषषट्कंतुवारु
ण्यां दृष्टेभव्यावरादि
का इतियामली
यस्वरोदयेवरादिका

DR. BHAU DAJI
डाक्टर भाऊ दाजी लॉ लायब्ररी

भूमिः वक्ष्यितःसप्तमार्गेणमासाश्चैत्रादिको
णगाः पृष्ठदक्षिणगायु
ट्वित्रिभुंडाजयदामता २
इतिस्वरोदयेयामलेत्रिभुं
डभूमिः वायुतःसप्तमा
र्गेणयामार्धकुंभंप्रति
संमुखीजयदाप्रोक्ताम
त्सरीयंमहाहवे २ इतियामलीयस्वरोदयेम
त्सरीभूमिः पृर्वतःसप्ति
मार्गेणवेद४संख्याधटी
क्रमात् दक्षपृष्ठस्थिता
रक्ताधर्म्मभूमिरियंमता
इतिस्वरोदयेधर्म्मभूमिः

चैत्रादिमासाः ६		
वराटिकाभूमिः		
आश्विनादिमासाः		

आषा: कार्ति: फाल्गुन		चैत्र श्रावण मार्ग
	त्रिभुं डाभू मिः	
ज्येष्ठ आश्वि माध		वैशाख भाद्रप पोष

१२	१६	२०
८	मत्सरी भूमिः	२४
४	३२	२८

३२	८	८
२८	धर्म्म भूमिः	१२
२४	२०	१६

द्वादशरेइतसव्ये चैत्रा
स्त्रिभमणंत्रमात् वामा
त्रेसंस्थितारक्तभूमिःयुद्धे
मृतारव्याम्रुदायका
१ इतियामलेमृताभूमिः

फाल्गु माध	चैत्र	वैशा	अष
पोष	मृता भूमिः	आषा	
मार्ग	आश्वि न	कार्ति	भा

इंद्रवायुयमरुद्जलाग्निशशिराक्षसे यामो
दयाभवेद्भूमिर्धृष्टिःदृष्टेतयप्रदा २ इतिया
मलेधृष्टिभूमिः चैत्राद्याः
पूर्वतोमासावामगास्तेदि
गष्टके पुनर्मार्गादितोमा
साःशेषाःकाष्टाचतुष्टये २
क्षयाभूमिर्भवेदेवंदक्षि
णानतथाऽक्षया क्षया
वामाक्षयादक्षेजयदाना
त्रसंशयः इतियामलेक्षयाक्षयाभूमिः

४	प्रहर	६
७	धृष्टि भूमिः	२
२	५	८

वैशाख	चैत्र मार्ग	कार्ति	कार्तिक	चैत्र मार्गशी	वैशाख
ज्येष्ठ पोष	क्षय भूमिः	आश्विन फाल्गुन	आश्विन फाल्गुन	अक्ष याभूमिः	ज्येष्ठ पोष
आषाढ	श्रावण माध	भाद्रपदा	भाद्रपद	श्रावण माध	आषाढ

आषाढ	चैत्र मार्गशी	भाद्रप	तुर्य्यातुर्य्यादिशंयाति
आश्वि	दुर्मति भूमिः	ज्येष्ठ माध	वामंचैत्रादिपूर्वतः
वैशाख पोष	श्रावण	कार्तिक	समरेदक्षदृष्टस्था
			दुर्मतीयंजयप्रदा १
			इतियामलेदुर्मती
			भूमिः सर्वात्रराशि
			नैर्ऋत्येयमतोयानिलेशिवे प्रहरार्ध्यो

दयासानुग्रहस्थाप्रवराशुभा १ इतिप्रवराभू

३२	४	१२
४	प्रवरा भूमिः	२०
२८	२४	१६

मिः पूर्वोत्तरदिशोःशु क्ले कृष्णे पश्चिमया म्ययोः जयदापक्षभो गन गोरीकाली क्रमे णच १ इतियामले गोरीकालीभूमिः



वक्रितःसव्यमार्गेण यामभोगोदिगस्तके नारहर्य्यास्वकाभूमि: र्जयदाग्रहदक्षिणे १ इतिस्वरोदयेना रहरीभूमिः पूर्वोत्त रेजलेयाम्येवा क्री

भाद्रप द	चैत्र चोष	श्रावण
वैशाख माध	बला भूमिः	आषाढ मार्ग
आश्विन	ज्येष्ठ फाल्गु	कार्तिक

शवायुराक्षसे यमेऽस्तो म्यतोयेचचैत्रादिमास भोगगा १ इयंभूमि र्बलाख्यासासंमुखी

७	८ प्रहर	१
६	नारह रीभूमिः	२
५	४	३

वामाशुभा भंगदा दक्षग्रहेचयुद्धका लेनसंशयः इति यामले बलाभूमिः

मेषादिद्वादशरेवामभागेणाश्वरी रेवरेवरीदक्षभागेणाभ्रमोऽमतिसर्वदा व क्रस्थाभूचरेवक्रेशीघ्राःखेचरगाग्रहाः भूचरादक्षदृष्टस्थाखेचरावामसंमुखाः २ भूचराःस्थायिजयदाखेचराश्चेवयायि नः सौम्यासौम्यक्षिणागंतुविज्ञायफलमा दिशेत् ३ इति स्वरोदयेभरणी रेवरीभूमिः पूर्वोक्तेपावके कोणेऽपरोक्तेवायुकोणेचरे इ येंगुह्याभिधाभू मिर्जयदादृष्टदृ



क्षिणे इतियामलेगुह्याभूमिः पूर्वतोनि र्वहन्मासाद्वादशाचेचस्तस्मिंगाः चैत्राद्या द्वादशीभूमिर्जयदादृष्टदक्षिणे २ इतिया मलेद्वादशीभूमिः आग्नेयकोणतोवामेपू



र्णिमादितिथिक्रमात् साधैर्दिनद्वयंभद्रा
वायव्येसार्धपंचकं १ सम्मुखवीवामगा
भव्यावर्जयात्रायांसमरेतथा पुर

३॥ ७	१॥ ३	३॥ १५
३॥ १०	विष्टि भूमिः	३॥ ११
३॥ १४	३॥ ८	३॥ ८

ग्रामगटहादीनांप्रवे
शेशुभमिळता इ
तिविष्टिभूमिः इं
द्रवह्नीशसोम्यच
नैर्ऋत्येंद्रजलेयमे
तोययाम्योत्तरेवा
यौम्रमध्येत्रादिमासतः १जयदादक्ष
पृष्टस्याभंगदावामसंमुखी केवलेयं
महाभूमिर्युद्धेचैव चतुर्विधे २ इतिस्व
रोदयेकेवलाभूमिः
ईइचंद्राग्निनैर्ऋत्यवा
म्यांवुवायुरुद्रगा नै
र्ऋत्यांवह्निलेसोम्ये
रुद्रेंद्राग्नियमाधिपे १

ज्येष्ठ	चैत्र भाद्र	वैशाख
आषा माघ	केवली भूमिः	आश्विन पौष
फाल्गु	कार्ति क्ष	मार्ग आवणः

८ १३	२ १४	३ १५
२ १२	त्रैलोक्य विजया	५ ११
७ १५	६ १०	४ ९

प्रतिपदादिभ्रमत्सेषा
जयदाष्टदक्षिणे
त्रैलोक्यविजयाभूमिः
भूबलानांबलोत्कटा
इतियामलेत्रैलोक्य
विजयाभूमिः छ

वारोरुद्रःपूर्वदिग्भागेनतःसव्येनमंदगः
यत्रस्थस्तत्रकालस्यात्पराजस्तस्यतुसंमु
खः १दक्षिणस्थःशुभःकालःपार्श्वगोवा
मदिग्गोत्रिमः यात्रायांसमरेश्रेष्ठस्ततो
न्यत्रनशोभनः २ इतिकालपाशभूमिः

०	२	४
काल पाशभूमिः		मं पाश
६	७	८

चैत्राद्याःपूर्वतोमासा
वामगादिकूचतुष्टये
यत्रस्यात्तत्रतोयाति
यामार्धेनदिगष्टके १
भंगदाष्टदक्षेत्यजय
दावामसंमुखी इयं
करालिकाभूमिः संग्रामेशत्रुनाशिनी २

४	चैत्रआवणमा ४	
वैशाख भाद्रपद पौष	करालिकाभूमिः	आषाढ कार्तिक फाल्गुन
४	ज्येष्ठआश्विनमा ४	

इतिस्वरोदयेकरालिका
भूमिः मध्यबाह्यक्रमे
णैवपूर्वतोवाममार्गगा
यामर्धमुदयंयातिसर्व
कालंदिगष्टके १ बाह्यो
ह्यादयानुबाह्यानांमध्यस्थानांतुमध्यगा

१६	८	३२
१२	४	२८
२४	२० वडवा भूमिः	२० २४
२८	४	१२
३२	८	१६

वडवेयंतुभूमिः
शत्रूणांक्षयकारि
णीइतिस्वरोदये
वडवाभूमिः चैत्रा
द्याःपूर्वतोवाममध्य

मणादिक्रयतुल्ये समुखीजयदाप्रोक्ताभूमि
रेषापराजिता १ इतियामलेपराजिताभू
मिः नैर्ऋत्यादिभ्रमोवामेतुर्यतुर्यादिगष्ट
के चैत्रादिमासगारीईीजयदाष्टदक्षिणे

	चैत्र श्रावण मार्ग		श्रावण	वैशाख पौष	आश्वि न
वैशाख भाद्रप पौष	पराजिता	आषाढ कार्तिक फाल्गुन	कार्तिक	रोईीभूमिः	आषा ढफाल्गु
	ज्येष्ठ आश्वि माघ		ज्येष्ठ माघ	भाद्र	चैत्र मार्ग

इतिस्वरोदयेरोईीभूमिः उदयाघुदलंयाव
त्दक्षिणस्थोजयीभवेत् तदूर्ध्वंचोत्तर
स्थंतुशिशुभूमियियंमता इतिस्वरोदये

उत्तराभिमुखआसन आकृ		
शिशुभूमिः		
दक्षिणाभिमुखआसाये		

शिशुभूमिः कर्कादि
रुग्विदिशेमकरा
द्यत्रिकोणतः यामे
कंसव्यमार्गेणमातंगी
दृष्टगाजयेत् १ इ
तिमातंगीभूमिः

कर्कादि षट्क	२	मकरादि षट्क
८	मातंगीभूमिः	४
७	६	५

पूर्वतोवाममार्गेण धदाः
पंचदिगष्टके अभे
द्याजयदाप्रोक्तासंमु

२०	५	४०
२५	अभेद्या भूमिः	३५
३१	३५	३२

रवीसमरेसदा इतिस्वरोदयेअभेद्याभूमिः
द्वादशारेधटीपंच पूर्वतोवाममार्गेण जय
दावामदृष्टस्थादहनीभूमिराहवे १ इति

यामलेदहनीभूमिः क
वर्ज्यादिचैत्रतोक्रमांसाः
स्वव्यमार्गेणकोणगाः
पंचनाडीत्रिमत्येवंजिता
दृष्टेजयप्रदा १ इतिया
मलेजिताभूमिः द्वादश
रंध्रतोवामं चैत्रादौयत्र
संस्थिता तत्रतोधटि
काः पंचसव्यमार्गेणनि
र्मिता जयदादक्षिणेभा
गेमृत्युदान्यत्रसंस्थिता
प्रोक्तावायुबलाभूमिः वा
यवलानांबलोकदा २
इतिस्वरोदयेवायुबलाभू

			ई	ऊ	आ
		क·मा ३२	अग ४	रा·मे ८	
	चन्द्रसिं ३८	वर्णको ळानला	य·म्ह १२		६
	ट्था ३४	त·स· २०	प·म्ह १६		
	वा	प	नै		

भिः अष्टारेवाममा
र्गेणान्यस्ववर्गाष्टकं
क्रमात् भ्रमणंस्वसि
द्धिमार्गेणयामार्धमुदयो
भवेत् १ योधनामोदि
नेवर्गेदृष्टदक्षिणतः

ज्ञोरः मासगतःसंख्यादक्षिणगामी स्वरोदयेतो अत्रवारा दिक्चारो नाडीतिथा रसंख्यः

क·मा २२	अ·ग ४	श·मे ८
वसिं २८	वर्गकि ब्राक्षो	य·मू १२
ट·श्वा २४	त·स २०	प·मू १६

मध्याह्नरज्जुघटिका २	
कापालिकाभूमिरेषा	
	सर्वाभ्र
अनेला निलाभ्रः	
अपराह्न	

रा	र	वं
श	ग्रहभूमिः	मं
शु	गु	बु

हते वर्णकालानलीभूमिः ईदृग्युद्धेजयाव
हा २ इतिस्वरोदयेवर्गभूमिः दिनमध्यस्य
नाड्येकाकपालस्फोदि
वाकरे नश्येद्यायीज
येस्थायीभूमिरेषाक
पालिका १ इतिस्वरो
दयेकपालिकाभूमिः
पूर्वाह्णे पावके कोणे प
राह्णे वायुकोणगा जय
दादक्षदृष्टस्थाभूमिरेषा
नलानिला १ दक्षेष्ट
ऐरवेर्बिंबंजयार्थंरण
मूर्धनि चेद्बिंबंतनोरा
त्रीपुरोवामेपिशोभनम्

इतिसूर्यबिंबभूमिः
दक्षदृष्टस्थिताः क्रू

रा:सोम्याद्यामाग्रसं
स्थिताः संग्रामिजयदः
प्राक्तामिश्रामिश्रफल
प्रदाः इतिस्वरोदयेग्र
हभूमिः भास्करोयत्र
संस्थितेद्वादशरेपसम

तः सराशिदक्षदृस्थः संग्रामेजयदोम
तः इतिस्वरोदयेराशिभूमिः सूर्यक्षेत्रा
दितोऽन्येलग्नंत
त्कालसंभवं दृष्टद
क्षिणगंकृत्वाजये
द्युद्धेनसंशयः इति
यामलेलग्नभूमिः

मीन मेष	वृषि	
अंभः	मिथु	
मकर	लग्न भूमिः	कर्क
धन		सिंह
वृश्चि	तुला	कन्या

राहुकालानलेचक्रे
ज्ञात्वालग्नंदिवाक
रो वदनाद्यंगभेदे
नकथयिष्यामिभू
बलं १ राहोर्मुखस्थि
तश्चंद्रः दृष्टभागेजयप्रदः मुखसंपुट
गयुद्धेवामेग्रेवजयावहः २ कपालपुच्छ
योश्चंद्रोवामेभागेजयप्रदः भानुःसर्वत्र

राहुकालानलाभूमिः

सर्वांगेजयदःदृष्टद
क्षिणे ३ इतिस्वरो
दयेराहुकालानली
भूमिः ८ अकारा
द्याःस्वराःपवनंदादि
तिथिक्रमात् स

MAHARAJA SAWAI MAN SINGH II MUSEUM

यमार्गोदियास्तेच पंचस्थानेषुसर्वदा १
ततस्तिथ्यादितोभुक्तिप्रत्येकंरविनाडिका
दक्षषट्स्थिताश्चत्वारोवामत्रेमृत्युदायिका
२ मध्यभागोदयेमृत्युसैन्ययोरुभयोरपि
किंकिस्थायीजयीयुद्धेस्वरभूमिरियंम
ता इतिस्वरोदयेस्व
रभूमिः चैत्रादिपू
र्वतःसव्ये चतुर्दिक्षु
त्रयंत्रयं त्रिकालरु
द्रभूम्येषाजयदाह
षदक्षिणे १ इतिया
मलेत्रिकालभूमिः स
प्तरेखांकितेचक्रे इति
कादिन्यसेद्बुधः धिस्थे
यत्रस्थितोराङ्कः रक्षरा
ङ्कसउच्यते १ इतिस्व
रोदयेनक्षत्रराङ्कः
द्वादशरेषसव्येन
मासांश्चैत्रादिकान्
न्यसेत् वरुन्मासस्थि
तोराङ्कमासराङ्क
सउच्यते १ इतिस्व
रोदयेमासराङ्कः



यस्मिन्नरेशेराङ्करस्तितत्संख्याकेमासिस्थाप्यः २

रवेस्तिरगतःक्रुद्धेशुक्ले
पश्चिमदक्षिणः पक्ष
भुक्तिप्रमाणेनपक्षरा
ङ्कस्यमतः २ त्रिंश
द्दंडांकितेचक्रेवक्रितः
पूर्णिमादिकान् तिथीन्विन्यस्यस्यादे
वं पक्षराङ्करिक्षांते; इतियामलेऽप्तरेराङ्कः

सप्तरेखांकितेच
क्रेकोणरेखाद्व
यंकिते कृत्वा
विलोममार्गेण
संस्थाप्यंतिथिमं
डलं पूर्णिमाद्य
ग्निरेखांतास्ति
थिरेखाक्रमेण
च तिथिभोगभ्र
मोराङ्कर्दिनरा
ङ्कःसउच्यते ३
इतिस्वरोदयेदि
नराङ्कः खेंद्यां

क्रुद्धेतृतीयायांसप्तम्यांभूलिनोदिशि
दशम्यांधनेदशम्यांवायव्यांभूतवासरे
शुक्लपक्षेतुवारुण्यांचतुर्थ्यांसमुदेत्स

सौ नैर्ऋत्येऽथतथाष्टम्यामिकादश्यांयमो
कसि २ आग्नेयेपंचदश्यांचमासेराक्ष
दयेसति खंडग
त्याग्रमत्सेवंखंड
राक्षस्ततोमतः
इतिस्वरोदयेखंड
राक्षः ईदृवायुप

रू.प ७	रू.१	रु.८ २२
रू.प १४	खंड राक्षः ४	रू.प ११
रू.प १४	रू.प ४	रु.प ८

मरुदतोयाग्निशशिराक्षसे यामार्धमुदि
तोराक्षर्भ्रमत्येवंदिगष्ट
कं इतियामलेर्ध्वयाम
भूमिः ईशानयमवा
तेंद्ररक्षः सोमाग्निवा
रुणे पूर्वाह्णेपिभ्रमत्ये
वमपराह्णेप्ययंक्रमः
जलाग्निसोम्यनैर्ऋत्ये
शक्रानिलयमेंद्ररू
र्वायव्येभ्रमत्येवापंरा
त्रेप्ययंक्रमः दिनपंचदशांशेनमुहूर्तःप
रिकीर्तितः एवंमौहेर्तिकोराक्षज्ञातव्यः
स्वरवेदिभिः इतिस्व
रोदयेमुहूर्तराक्षः र
विः सोमः क्षजः सो

१६	८	२४
२८	यामा राक्षः	१२
८	२०	३२
१६	२०	८
२	८	२८
१२	दिन राक्षः	८
६	१६	२०
१२	२	८

दिनस्यषोडशांशेनेतिसाधीयान्पाठः ५

म्यो गुरुः शुक्रः शनिस्तमः ऐंद्रादीशनपर्यं
तमर्धयामभ्रमः स्मृतः १ दिनवारोदयाज्ज्ञेयो
स्तूर्यतुर्यदिशःक्रमात् ज्ञेयः कुलिकजोराक्षः
स्थानेयत्रशनेश्वरः
२ इतिस्वरोदयेकुलि
कराक्षः संमुखावा
मसंस्थावायस्थेयं
राक्षमंडली पराज

राक्षः ३२	रविः ८	चंद्रः ८
भौमः २८	कुलिक राक्षः	मंगल १२
शुक्रः २४	गुरुः २०	बुध १६

योभवेत्तस्यवादसूत्रणादिषु १यस्यदक्षि
णेष्टस्थाश्वेषाराक्षपरंपरा सहस्रंसश
तनापिपरसैन्यंनिरुंधंति इत्यष्टवेधोराक्षः
दिग्यस्यांस्थितश्चंद्रः स
व्यमार्गेणराशिगः राशिच
द्रः सविज्ञेयः सर्वदास्वरवे

शुक्रः ८	रवि ८	बुध ८
भौम ८	कुलिक राक्षः	शनि ८
राक्षः ८	गुरु ८	चंद्रः ८

योग्रहोयस्यांदिग्यवस्थितोयस्मिन्याम
वतादिशानश्चतुर्थदिशिगणनयायस्या
दिशिअर्धयामभोग क्रमेणायस्मिन्नर्ध
यामेग्रहराशिरागच्छेत्तस्यांदिशिस्थिते न्न
र्धयामेवकुलिकराक्षवस्थितिर्वाक्य
र्थः। तत्रदृष्टांतार्थंरविवारतएवचतुर्थ
चतुर्थदिग्ग्रहन्यासः। शनिरुत्तरचतुर्थि
शतिघटिकोत्तरमष्टाविंशत्यधिकुलि
कराक्षः। तच्चक्रन्यासनेवस्पष्टार्थंए
वंचंद्रादिवसेधपिज्ञेयं १२

मेषाद्येराशिभिर्युक्तेसव्यंद्वादशप
त्रके। यत्रजन्मर्क्षान्वितोराक्षस्तिष्ठतिशिरि
ध्रुवंदेहंतिकल्पलता ॥ इतियामुक्तं॥२

१२	१	२ ३
११	राशि चंद्रः	४
१०		५
९	८	६

दिशिः १ इतियामलेराशिचंद्रः समसप्तशलाकारव्येकृत्तिकादिसमन्वितेशुक्लपक्षेद्वितीयायौ यत्रभेभ्युदितःशशी इतियामलेउदयशशी चक्रेसप्तशलाकारव्ये बहुन्मासर्क्षगःस्पष्टो मासचंद्रोभवेदेवं ज्ञातव्यः

स्वरवेशिभिः इतिस्वरोदयेमासचंद्रः पूर्वोत्तरगतःशुक्लेकृष्णेदक्षिणपश्चिमः पक्षशुक्लिप्रमाणेनपक्षचंद्रइहोच्यते इतियामलेपक्षचंद्रः चक्रेसप्तशलाकारव्येऐंद्र्यांमध्येकेभान्यसेत् ततोवामेनचंद्रर्क्षंदिनचंद्रइहोच्यते इतियामलेदिनचंद्रः दिनभान्वोरेव



सत्येनसपादघटिकाद्वयं प्रतिनाड्यांभवेद्भुक्तिः रेषनत्कालिकः शशी २

पादप्रभाभांशुहतिसंयुक्तनाभांहिभाजितालब्धिरणीसमानेत्यूर्ध्वतिर्यक्स्तोमतिमेतियोधाः शेषस्यतुल्येविधुतोयदिक्थः॥

सप्तमोबिंबरूपेणप्रत्यक्षंदृश्यतेवामाग्नेयजयदश्चंद्रः एवंसप्तविधःस्मृतः इतिस्वरोदयेसप्तविधचंद्रः दक्षिणेनगतोमासान्

जयदोयाम्यपाश्चिमे उत्तरायणसूर्यस्थोविजयंशुक्लसोमयोः इतियामलेयेनभानुः सप्तरेखांकितेचक्रेभानुर्भंयत्रसंस्थितं दिनभानुर्भवेदेवं चंद्रवच्चेष्टकालिकः १ प्रत्यक्षंदृश्यतेयस्यभानुर्बोधिरोस्थितं दक्षदृष्टस्थितेनाएतेकनीव्याजयकांक्षिभिः इतियामलेदिनाद्भानुः पूर्वस्यांमुदयेद्बालीप्रथमेनवमेतिथौ माहेशीयोत्तरस्यांतुद्वितीयादशमीतिथौ १ एकादश्यांतृतीयायांकौमारीवह्निरो मृ आ पु पुआ



जयदायायिनीवामेस्थायिनीदक्षिणेसचेत् उभयोर्जायतेमृत्युर्योगिनीवामदक्षिणे॥ दक्षिणेजयदाप्रोक्तावामेचैवपलायनं। संमुखेस्यान्महालाभेवर्जयेद्योगिनीद्वयं

कोणगा चतुर्थीद्वादशीप्रोक्ता वैष्णवी नैर्ऋतेन
था २ वाराही दक्षिणेभागे पंचमी चत्रयोद
शी षष्ठीचतुर्दशी
चैवेंद्राणीप
श्चिमेतथा ३ इ
न्द्रियायवसप्तम्यां
वायव्येचंडिकोद
यः नष्टचंद्रदिना
ष्टम्योर्महालक्ष्मी
रिशालये ४

महालक्ष्मी ३०।८ ई	वाराही २।९ पू	कौमारी आ
माहेश्वरी उ २।१०	योगिनी चक्र	वाराही द ५।१३
वा चंडिका ७।१५	प ६।१४ इंद्राणी	नि ४।१२ वैष्णवी

यत्रोदयगतादेवी ततोयामार्धभुक्तिभा भ्र
मतीतेनमार्गेण भवेत्तत्कालयोगिनी ५ इंद्र
इंद्राग्निनैर्ऋत्येयाभ्ये
तोयानिलेहरे स्वर्या
दिषु चवारेषु वर्जयेद्वा
रयोगिनीं ६ दिक्स्था
नांसंमुखेदक्षिणादिक्
स्थावारूणेमता कोण
स्थानांच कोणेन तिथिदि

राहु ३२	रवि ४	भौम १२
चंद्र ८	तत्काले वारयो गिनी	बुध २०
शनि २८	शुक्र २४	बुध १६

राहु ३२	रवि ४	भौम १२
चंद्र ८	तत्काले वारयो गिनी	बुध २०
शनि २८	शुक्र २४	बुध १६

युदयःक्रमाद् जय
दाष्टदक्षस्थाभंगदा

वामसंमुखी त्रिविधंयोगिनीचक्रमित्थकं
बृहद्यामले ८ इतिस्वरोदयेत्रिविधयोगि

	२।२० वाहे	२।९ मध्ये	८।३० वाहे	९२
तिथिकाल भूमिः	३।१९ मध्ये	श्रीः	७।१५ मध्ये	तिथिका लभूमिः
	४।१२ वाहे	५।१३ मध्ये	६।१४ वाहे	

नीचक्रं मध्यवाह्यक्रमेणैववामंप्रतिपदादि
षु वर्तमानतिथौकालं वर्जयेदाश्रयहृये
दितिस्वरोदयेतिथिकालः षट्त्रिंश ३६
ध्रुवकंकृत्वागताहान्वियोजयेत् अष्ट ८
भेषवेत्कालोजयदःष्टदक्षिणे १ इतिस्वरो

०	रवि मध्ये	चंद्र वाहे	दयेवारकालचक्र
शनिः मध्ये	श्री	मंगल मध्ये	दक्षेष्टस्थितोवा युर्जयदोभवतिध्रु
शुक्र वाहे	गुरु मध्ये	बुध वाहे	वं वामेयेभंगदःप्रो क्तः सर्वयुद्धेषुसर्व दा तिर्यग्वायुः यु

द्धकालेयदाक्षुचंद्रःस्थायीजयतिनिश्चितं
यदासूर्यप्रवाहरूपायीविजयतेतदा १ पा
र्थिवसक्षतंयुद्धं संधिर्भवतिवारूणे विज

योयक्षितत्वेनयोयोभंगोस्तिस्करवे २ पू
र्णनाडीगतःपृष्ठेशून्यमंगंतदयतःशून्यस्थो
नेगतःशत्रुभियतेनात्रसंशयः ३ पूर्वोत्तर
दिशोश्चंद्रोमानोपश्चिमयाम्ययोः।स्थितस्त
त्रजयीयुद्धेस्थायीयायीक्रमेणच ४ वामना
ड्युदयेचंद्रःकर्तव्योवामसंमुखः।सूर्यवाहेतथा
सूर्यःपृष्ठदक्षिणगोजयेत् ५ इतिस्वरोदये
शरीरीभूमिः एतानिभूबलान्यत्रज्ञात
व्यानुदितक्रमात् सन्निपातेविशेषेणभूमि
मेलापकोबली १ मासेमक्षेदिनेनाड्यांयदु
क्तंभ्रमणंपुरा यथादिनेतथारात्रौज्ञातव्यं
स्वरवेदिभिः २ युद्धस्यप्रातिदिनेसाधेबत
स्थेस्वरेसारगः भास्करस्यमहामंत्रंज
पेदयुतसंख्यया ३ दशांशंहोमयेत्कुंडचि
कोणेद्वादशांगुले अर्कस्यचसमिद्भिष्यै
र्मध्यार्केज्योपरिस्थितैः ४ ॐह्रींसःसू
र्यायनमः इतिमंत्रेस्याद्यंतेहोमयेत्

युद्धारंभेहयारूढःस्वरज्ञोदृढमान
सः पुनरेवजपेन्मंत्रंज्ञातेकंसूर्यसंमुखं
५ शुक्लवासोंतरेधृत्वाततस्तूर्यविलोक
येत् यावच्चदृश्यतेचिह्नंशुभंवायदिवा
शुभं ६ सं संपूर्णतेजसायुक्तेयक्तेनि
कटवर्तिनि श्वेतेयकर्बुरपीतेसूर्ययो

यीजयीभद्रेरखंडितेरखंडितसंयुक्तेलिखेभि
न्नेचवक्रितेशूचेकृष्णारुणेसूर्येस्थायीज
यतिसर्वदा ८ भूबलानिसमारब्धंनेचतुर
शीतिसंख्यया यदाश्रयबलादाभुशत्रुश्रीः
करगामिनी ९ अर्केयदार्धमासेनिजद
लसहितेवासरेचैवयामेपामस्याधेमुक्त
तेभ्रमतिचघटिकातद्दशाष्टकेपि संग्र
ामेचानुरंगेकविरणेखलकेकोटयुद्धेभ
टानांनिःसंदेहंजयार्थेनरपतिगदितंभूब
लंतथ्यसारं १० इतिश्रीनरपतिजयच
र्यायांस्वरोदयषडंगेसमाध्यायेभूबलाध्या
यश्चतुर्थःसमाप्तिमगमत् पुनरन्य
त्प्रवक्ष्यामिमंत्रयंत्रादिकंबलं यस्यप्रभाव
तोयुद्धेदुर्बलस्यबलंभयेत् १ चतुरस्रंच
तद्वारंत्रिरेखंपन्नगभितं हस्तत्रयप्रमाणं
चतंडुलैर्मंडलंलिखेत् २ पत्रपत्रेलिखेद्
वान्श्चतुषष्टिप्रमाणतः एकैकपद्मपुष्प
सुसंख्यादलेदले ३ भैरवीभैरवासिद्धि
ग्रहनागाउपग्रहाः पीठोपपीठसंयुक्ताः
दिक्पालैश्चसमन्विताः ४ कर्णिकायां
न्यसेद्देवंशिर्वसांगैसशस्त्रकं प्रणवादि
नमोंतेश्चनामतंमंत्रैस्तत्रोर्चयेत् ५ मंड

लाग्रेलिखेत्पल्लवीरंतत्रनिवेशयेत् नीर्यो
दकान्वितेकुंभैःसद्भक्षितपल्लवैः ६ मृत्यु
जयेनमंत्रेणशतवाराभिमंत्रितैः अभिषिं
चेत्ततोवीरंशुभलग्नेस्वरोदये ७ ॐजूंसः
इतिमृत्युंजयमंत्रः अभिषिक्तःस्ततोवीरः
संग्रामेविजयीभवेत् शस्त्रैर्नभिद्यतेतस्य
शरीरंशत्रुबोधितैः ८ एतन्मंडलमध्यस्थो
भिषिक्तःपुरुषोयदा ततःप्रभृतियुद्धेषु
शत्रुंजयतिसर्वदा ९ राज्यभ्रष्टोलभेद्राज्यं
क्षीणायुश्रियमेनच मुत्कापीडांग्रहाः
सर्वेशांतिंप्रयांतिस्मर्वदा १० इतिस्वरोद
येऽभिषेकविधिः अभिषेकोत्तरंपू
जाकर्तव्यापूर्वमंडे मृत्युंजयेनमंत्रेणपूर्वो
क्तविधिनाततः ११ ॐजूंसः पश्चात्त
मर्घ्ययेन्मंत्रंरणादीक्षाभवेदियं नयासम
न्वितोवीरस्त्रिदशैरपिदुर्जयः १२ इतिरण
दीक्षा पूर्वोक्तिमंडलस्यांते योधशस्त्रा
णिविन्यसेत् पूजयेद्विधिवत्तानितत्तोजा
गरणक्रिया १३ ॐरवांखैंरवूंरवैंरवौं
रवःरौद्रमूर्तयेरवङ्गायनमः इतिरवङ्गमं
त्रः ॐक्रींक्रूंक्रैंक्रौंक्रः ॐभैरवरूपा
यरक्षायुधायफलकायनमः इतिफल

कमंत्रः ॐल्रांल्रींल्रूंल्रैंल्रौंल्रः इंद्रायुधायध
नुषेनमः इतिधनुर्मंत्रः ॐश्रांश्रींश्रूंश्रैंश्रौं
श्रः ब्रह्मादिपंचदेवतामूर्तयेपंचबाणा
यनमः इतिबाणमंत्रः ॐक्रींक्रींक्रूंक्रैंक्रौं
क्रः शूलिनमूर्तयेकृतायुधायनमः इतिशू
लमंत्रः ॐअघोरेश्वरीचामुंडेमहाचामुंडे
छ्रांछ्रींछ्रूंछ्रैंछ्रौंछ्रः भगवतीमूर्तयेकात्यायनी
छुरिकायैनमः इतिछुरिकामंत्रः इतिरणपू
जाविधिः छागीमातुलाग्निनेयौतद्रोम
कृतदोरके॥मृत्युंजयेनमंत्रेणादातव्यंग्रंथि
सप्तकं १ एवंकृतविधानेनजायतेरणकं
कणं दक्षहस्तप्रबद्धेनतेनयुद्धेजयीभवे
त् २ इतियामलेरणकंकणं कर्पूरकुंकु
मंचैवगोरोचनसमन्वितं कोकिलाक्ष्य
स्थलेरक्तन्यास्वेतवस्त्रेतिशोभने ॐकारद्व
यमध्यस्थंसाध्यनामपदेलिखेत् तन्मूर्ध्न
स्थहकारस्थंठकारपरिवेष्टितं ४ एवंसं
पुटमध्यस्थंवज्राष्टकयुतांतकं प्रणवाद्य
रिनामेहुंफडंतंदिगष्टके ५ मंत्रमेतंस
तंजप्त्वापटंतन्मूर्ध्निबंधयेत् भीरुंनय
तिवीरत्वंसमरेजयप्रदं ६ इतिवीरप
ट्टस्यविधिः पूर्वोक्तेनविधानेनरणपट्ट

मितोलिखेत् कृत्वा हनूमतो रूपं हृदि मे
त्रमुलिखेत् ७ ॐ क्रौंक्रीं हूँ फैं फौं फः
हनुमतेनमः मंत्रमध्येलिखेन्नामनिज
योधस्यसंभवां मूर्ध्निबद्धेनतेनैव हनु
तुल्यपराक्रमः इतिस्वरोदयेरणपद्धति
धिः त्रिशूलंदक्षिणेहस्तेकपालंवामके
तथा भीषणंभैरवंरूपंपूर्वद्रव्यैःसमालि
खेत् ९ त्रिपुरामंत्रनामभ्यांग्रंथनेनतु
वेष्टयेत् मूर्ध्निबद्धेनतेनैवत्रैलोक्यंजय
तिध्रुवं १० ऐं क्लीं फौं त्रिपुरायैनमः
इतित्रिरामंत्रः इतिजयपट्टः कन्याकीर्ति
तस्त्रेणाअष्टोत्तरगुणेनतुच कर्तव्योदो
रकस्तेनसग्रंथिकटिमानतः भत्कंजये
नमंत्रेणग्रंथिमष्टोत्तरंशतं कृत्वैकमेरव
लाजाताकटिबद्धारिनाशनी २ ॐ नुंसः
इतिभैरवलामंत्रः अत्रबलाणीकवचंकृत्वा
योद्धोधःप्रविशेद्रणे प्रभवंतिनतस्यांगे
प्रहाराः शत्रुनोदिताः ३ इतिकवचं अ
नुलोमविलोमेनमंत्रंभत्कंजयंजपेत् र
क्षोन्यषडंगेषुन्यासोयंशस्त्रवारणः ४
इतिन्यासः रसनाधंटिकायस्थाअं
गुष्ठोनाभिकातले एतत्मुद्राप्रभावेणसं
ग्रामेविजयीभवेत् इतिमुद्रा पूर्वोक्तै

पूर्वोक्तैरेवद्रव्यैस्तन्मूर्जपत्रेसुशोभने
लिखेन्मृत्युंजयमंत्रंतन्मध्येवीरनामकं ६
मृत्युंजयेनमंत्रेणग्रथितंतन्नामकं रक्षां
कृत्वाकरेवधासंग्रामेविजयीभवेत् ७
ॐ नुंसः इतिरक्षा आरण्यपलाशमूलं तू
लंपुष्याकेणोत्पाट्यते कन्याकीर्तितसू
त्रेणशतग्रंथनंतुदोरकं ८ ग्रंथयेन्मृत्युंज
येनप्रत्येकंचपृथक्पृथक् अष्टोत्तरश
तेनैकजायतेवीरकंकणं ९ ॐ कुमारीअ
वतारयअवतारयरक्षाणंकुरुवासिनी
त्रिपुरुषंसत्येनसर्वायुधंभंजयभंजय
स्वाहा इतिमंत्रः अंसकस्थेनतेनैवदु
र्जयस्त्रिदशैरपि स्तंभयेत्सर्वशस्त्राणि
सर्वशक्तिसमन्वितः १० इतिवीरकंकणं
ईश्वरीबलदंडीचकुमारीविष्णुवीतथा वा
राहीवज्रिणीचंडीतथारुद्रजटापिधा ११
लोगलीसहदेवीचपाठाराजीपुनर्नवा मु
द्गरीभूतकेशीचस्यामराजीहनूजटा १२ श्वे
तापराजितायुंजाश्वेताचगिरिकर्णिका क्ष
द्रिकाशंखिनीचैवविडंगीसप्तधारपुंखिका १३
रक्तजरीकेतकीताडीपूतीस्यान्नागिकेलिका
अंजनःकांचनास्चयंपकाश्मातकःकुरुः
१५ अपामार्गोद्रोणपुष्पीचबलदृक्षोपरक्त

कुमारीअवतरअवतरबलाणायणमोस्तुतेत्रिपुरुषंसत्येनसर्वायुधंभंजयस्वाहा २२

था शतमूली बलायुग्मं गोजिह्वोपलसारिका १६ अष्टलोहरसो वज्री हरिद्यातालकं तथा शिला एताश्चौषधयोदिव्या जयार्थं सेव्यते बुधः ७ स्वर्येऽह्युग्रहणे प्राप्ते दीपोत्सवदिनत्रये पुष्यभूव्वार्कयोगे च मन्त्रवर्षमिवासरे १८ स्वादिरेणतु कीलेन प्रोद्धरेत्ताम होषधीः बलिपूजाविधानेन सर्वकर्मसु सिद्धिदाः १९ येनत्वां खननेऽलाभ इंद्रादिष्ठुजिनेश्वरः तेनाहं खनयिष्यामि तिष्ठ तिष्ठमहौषधि २० तदोद्धृताः कटीसूत्र शिरःप्रभृतिषु स्थिताः त्रिदशैरप्यवध्यो सौ युद्धे चैव सुविधि २१ इतियामलेऽौषधानि चंडीवज्री च वक्री त्रिशूली सुकुरीतथा देहस्थासमस्तेषांसर्वायुधनिवारिणि २२ गृहीतपुष्यभक्षत्रे अपामार्गस्यमूलकं लेपमात्रेणवीराणां सर्वशस्त्रनिवारणं ॥२३॥ अंजनःकांचनारश्च चंपकोशंतकः कुक्कुः लेपेनविजयीयुद्धे वज्रदेहोभवेन्नरः २४ खर्जूरीमुखमध्यस्थाकटिबद्धाचकेतकी लुजदंडस्थितः स्नालः सर्वशस्त्रनिवारणः २५ दक्षबाहुस्थितश्चार्कोवामेहृदयेधरा रुद्रः षष्ठस्थितोयुद्धे वज्रदेहोभवेन्नरः २६

त्रिलोहवेष्टितंकृत्वा रसंवज्राभ्रसंयुतं वज्रस्थंचकरस्थंच सर्वायुधनिवारणं २७ गिरिकर्णीशमीगुंजाश्वेतवर्णासमाहरेत् चंदेणसंयुताःसर्वास्तिलकेनजयीरणे २८ अधपुष्पीशिरवाचैवश्वेताचगिरिकर्णिका गोरोचनासमायुक्तंतिलकंशत्रुमोहनं २९ कनकाकैवितोवक्रिःषड्विंदुःपंचमस्तथा कारोतितिलकंयस्तुपश्येत्तंपंचधारिपुः ३० कृष्णयक्षकपालंतुविनाम्रतरुवाचितं सितगुंजांवपेत्तत्र तस्यामूलंसमाहरेत् ३१ कृततिलकंभटंदृष्ट्वापश्येत्सेन्याकृतंरिपुः श्वगणैर्भक्ष्यमाणंतुपतितंचततोभुवि ३२ जयायस्यजलेयातिसंग्राहयःकाशमर्दकः अनेनतिलकंनारिःकूपंवापींप्रपश्यति ३३ इतिस्वरोदये तिलकं ब्रह्मदंडीचकोमारीईश्वरीवैष्णवी तथा वाराहीवज्रिणीचंडी महालक्ष्मीस्तथैव च ३४ एताश्चौषधयोदिव्यास्तथैतामातरः स्मृताः कृत्वाभशंकरेबद्धा सर्वशस्त्रनिवारिणी ३५ इतियामलेजटा वंगसीसकशुल्वाम्रहेमतारमन्वितैः वज्रायसादिभिर्युक्तःक्रियतेपारदोरसः ३६ वज्राणांद्रावणंवक्ष्येपारदस्यचबंधनं लघुश्रवंगलोहेषुसयोगार्थंपरस्परं ३७ अस्थिश्रृंखलमध्यस्थंकृत्वावज्रंनिरुंधितं जलमांडेविनिःक्षिप्यस्वेदयेद्दिनसप्तकं ३८

वंगिकारससंघृष्टंनष्टपिष्टतुपारदं टिका
कंदस्यमध्यरंध्रबंधनार्थंततःपुटे ३९ रंजितं
लोहचूर्णंतुटंकणेनतुभावितं लघुशाविभ
वेदेवंताम्रपात्रेनसंशयः ४० सर्वांस्तानेक
कान्कृत्वामुखमध्यास्थितान्भवेत् पुटि
काज्ञायतेरम्यानाम्नावज्रांगसुंदरी ४१
मुखस्थासिद्धिदाप्रोक्ताजरामृत्युविनाशि
नी संग्रामेविजयीवीरोवज्रदेहोमहाबलः
४२ सर्वलोकप्रियोनित्यं नारीणांवल्लभश्च
स्तथा गुटिकेमंसमाख्याता यथोक्ताब्रह्म
यामले ४३ इतियामलेवज्रांगसुंदरीगु
टिका सिंहीव्याघ्रीमृगीहंसीचतुर्द्ध
वंकपर्द्दिकाः एतासांलक्षणंवक्ष्येप्रभावं
चयथाक्रमं १ सिंहीसुवर्णवर्णाचव्याघ्री
धूम्रारसेरिवका मृगीतत्रविज्ञानीयात्पी
तपृष्ठांशितोदरीम् २ हंसीजलतराश्चेतव
दनातिदीर्घिका एवंविशेषान्विज्ञाय त
तःकर्म्मसमाचरेत् ३ ओषधीसिंहिकाना
मतस्यमूलस्ययोरसः हंसीकपर्द्दिकाम
ध्येक्षेप्यस्तन्मूलसंयुतः ४ विधायवदनंत
स्याःसिक्थकेनसमन्वितः अस्यांवक्त्रे
स्थितायांतुसिंहवज्जायतेनरः ५ महोन्म
त्तगजास्तस्यदर्शनेनपराङ्मुखाः रणे

राजकुलेद्यूतेविवादेचापराजितः ६ व्याघ्री
रसेनसंघृष्टःपारदोमूलसंयुतः पूर्ववत्सा
धयेद्व्याघ्रीफलंचैवतथाविधं ७ मृगमूत्रे
णसंभिन्नाम्लिकारससंयुता। मृग
धिक्षिप्तेमृगयांतस्याःफलमतःशृणु ८
मुखमध्येस्थितायाश्चवशीभवतिमानवः
रतिकालेमुखस्थायांबालाप्राणहरोनरः
९ हंसपार्दीरसेघृष्टःपारदोमूलसंयुतः ह
सीमध्येक्षिपेद्धीमान्मुखस्थासर्वसिद्धिद
दा १० ग्रहाःपीडांनकुर्वंतिसर्वविघ्नानि
वारयेत् स्थावरंजंगमंचैवविषंनश्यति
तत्क्षणात् ११ इतियामलीयस्थगोदयेकप
र्द्दिकासमाप्ता क्षत्रिकाचविशाखाच्च ।
सोमवारेणसंयुता तद्दिनेघटितंशस्त्रं
संग्रामेजयदायकं १२ इतियामलेयो
गघटितशस्त्राणि अपामार्गरसेनैवया
निशस्त्राणिलेपयेत् जायंतेतानिसंक्र
ग्रामेवज्रसाराणिनिश्चितं १ विधुसा
नमृतास्थीनिपेषयेत्करकांबुना अनेना
लेपनंकुर्यात्सन्नाहफलकेपिवा १ तत्र
लग्नानिशस्त्राणिच्युटंतिचनमंतिचनमिं
दंतिशरीराणिपुष्पाणीवमृदूनिच २

इतियामलेशस्त्रमोटनं कृष्णसर्पशिरो
स्थेणविषंचपलानिच कुकुंदरिवसा
शोचतथाचगरहगोधिका १ कृष्णस्प
श्चिकस्याशोकपिकल्लुःपलाष्टकं द्वीप
लोहरितालस्यकृकलासरसःपलं २
लांगलीकरवीराभ्यांत्रीणित्रीणिप्रकी
र्तिकाः एतेषांशेषितंकल्कंभल्लातक
समायुतं ३ सर्वेषामेवशस्त्राणांलेपो
यंसत्तुदाहृतः विद्धास्फुतेर्यमनुजाः
स्युर्जंतेर्जीवितंध्रुवं ४ रक्तकंचुकया
नारीरक्तप्रावरणचया नटदारसमा
युक्तापर्वतानपिसादयेत् ५ गृहीता
भक्षितानीलापक्षिंडुकीटकान्विता २
स्यलेपेनधाताद्धिजायंतेकीटकाव्रणे
६ इतिस्वरोदयेशस्त्रलेपः षड्विंशत्या
चतुष्पाश्चतेनाशेषान्तरेणवा २६।६४।१८
मयूरोलूकपक्षाणांतन्मानंग्रंथिपिछि
का १ ग्रहणेमुक्तिपर्यंतंरक्तसूत्रेणवे
ष्टयेत् इष्टमंत्रंजपेत्सप्तसिंहुंरणेरिना
शनं २ विसर्गंमूलजातेनगळगळपरं
ध्रुवं सर्वोच्चस्थानगोधीरःससैन्यवि

जयावरुः॥इतियामलेपिछकविधिः ७
लांगलीब्रह्मदंडीवृक्षहेडान्मतरसान्विचि
ता मर्दयित्वाविकेचर्मपश्चाद्यंत्रंसमालि
खेत् १ काकरक्तंतथाविष्ठाचितांगारकु
लाहलं काकपिछस्यलेखन्यालिखेद्यंत्रं
यमार्गलं २ मध्यबीजस्यमध्यस्थंशत्रुना
मससैन्यकं वाह्येवायुबीजवेष्टयेत्त्रिठ
एंपुनः ३ वायुमंडलगंकृत्वावायुबीजेन
रंजिका द्वादशस्वरसंयुक्तावेष्टयेत्सप्तमा
र्गतः ४ ताम्रकस्यास्यनादेनव्याकुली
भूतमानसाः बलंमुक्त्वामहावीराःपला
यंतेरणांगणात् ५ इतिस्वरोदयेताम्र
कविधिः हेमायस्त्रपुरीप्याणांसमैर्भा
गैस्ततःपुनः द्वादशघ्नेनताम्रेणकारये
ड्डयकाहलं १ काहलीरससंलिप्ता
वादयेन्नरणांगणे श्रुत्वानादंप्रणश्यं
तिबलिष्ठाअपिशत्रवः २ इतियमले
काहलविधिः ताम्रकस्यविधानंतु ढ
क्कायामपिकारयेत् तथैवफलमप्युक्तं
समरांगणसूत्रधृमि २ इतियामलेढ
क्काविधिः तुंबिनीचित्रकंदंडीहेडान्म
तरसान्विता मार्जयेन्मोरजंवर्म्मसप्त
वारान्पुटद्वयं १ २ दंडीसचित्रकादंती

लड्डालरससंयुताः पुटे विमर्दयेत्तेनजा
यतेवाद्यभोजनं २ आलीजातीकुमारीच
विद्युद्भस्योदकान्विता इष्टमंत्रांभिजप्तंतुज
यार्थेवाद्यभोजनं ३ इतिस्वरोदयेमुरज
भोजनविधिः अग्निहोत्रश्मशानांत्यजाती
गेहसमुद्भवं भस्मत्रितयमादायकर्त्तयित
स्फुटनं इंद्रवृक्षमयंकार्यमुसलोलूखला
दिकं चतुरस्रेसपद्मेचद्वारहीनेचमंडले २
स्थापितोलूखलेतत्रऊर्युक्तंभस्मऊर्द्धनै
चतुर्वर्णोद्भवाःकन्याःश्वतुःषष्टिप्रमाण
तः ३ लुचंविंशतिसंख्यानांसरासगीते
नसंयुतं तंरासंसंप्रवक्ष्यामिसर्वमंत्रम
यंशुभं ४ ॐकालउकुक्कुरुरुडुसुसु
डुयंतडुसुत्रिउवंभणुभल्लिकरंतउकिंएहा
एहिंकिंपिछएहिमइसुग्जउसुयउइति
इतिरासगीतंमंत्र एतद्भस्मकृतांरेखांलं
घयंतिनश्चवैरिणः क्षिप्यतेवरिपोःसे
न्यंभंगमायातितत्क्षणात् इतिभस्मसाध
नं श्रोत्रियब्राह्मणाकारुण्यंकरोति किं
स्नानैःकिंप्रोंछनैःभंगलंगतंगतमेव मा
रणेमारनेस्तंभविद्वेषोच्चाटनेवशे ए
कयमार्गलंयत्रंभेदनबुधास्त्रिजं हाद
शारंलिखेच्चक्रंवृत्तत्रयविभूषितं उष्ट्रमं

त्रंचतद्ध्येयमश्लोकंचमध्यतः २ ॐह्रीं
उष्ट्रीविकटदंष्ट्राननेकुरुकुरु इमंमुष्ट्रीमंत्रं
दशसहस्राणिजपेत् घृतंमधुनरक्तपुष्पैः
सहस्रमेकंहोमयेत् ततःसिद्धतियम
राजःसोमेयने
दारुणयोमेद
यः दयेयोनिर
योक्षेपयक्षेप
श्चनिरामयः ३
इतियमश्लोकः
इमंयमश्लोकंद्वा
त्रिंशत्सहस्राणिजपेत् घृतमधुरक्तपुष्पैः
सहस्रमेकंहोमयेत् ततःसिद्धोभवति
मनसेप्सितानिकार्याणिकरोति खित्तो
गारंविषरक्तंकृष्णोन्मत्तरसस्तथा एते
नरास्थिलेखन्यायंत्रंप्रेतपटेलिखेत् सा
ध्यनामचतन्मध्येकुंचरांजिकयाकृतं
यमरूपमिदंसाक्षान्महिषासनगंकुरु कृ
ष्णाष्टम्यांचतुर्दश्यांगंतव्यंपितमंदिरे न
ग्ननक्तंशिरवाभूत्वामद्यमांसेस्तुतोर्चये
त् दक्षिणोछिष्टशरावेषुकृष्णसूत्रेणवेष्ट
येत् श्मशानभूमिमध्यस्थःसप्ताहान्मा
रयेद्ध्रुवं ७ इतिस्वरोदयेमारणविधिः
रोचनाऊर्द्धमंचेदं कृष्णोन्मत्तरसान्वितः

रोहितोऽश्वलेखन्या भूर्जयंत्रलिखेदिमं
१ साध्यनाम चतुरश्रमध्ये बाह्ये वेकाररा
ज्ञिका वह्निमंडलगरुडाक्षरैस्त्रेणा
वेष्टयेत् २ सिक्थकथकेनावृतंकृत्वा
सुराक्रमेविनिक्षिपेत् पूजयेद्रक्तपुष्पै
रक्तसप्तहान्मोहयेद्ध्रुवं ३ इतिस्वरोद्ध
येमोहनविधिः शिलतालंहरिद्रांच
मेषमूत्रसमन्वितं कोकिलाक्षस्यले
खन्यानीलीरक्तपटेलिखेत् १ सा
ध्यनामचतुरश्रमध्ये रंजिकालंनिवेशये
त् पर्वताकृतियंत्रंचशिलातलनिवेशि
तं २ पूजयेत्पीतपुष्पैरक्तगंधेनधूप
वपुनः स्तंभनंदेहमनसोः सप्ताऽहाऽऽ
यतेरिपोः ३ इतियामलेस्तंभनं निशा
क्षचित्रकैःरक्तल्येन्मीहिपाश्वरुधिरान्वितैः
प्रेतवस्त्रेकलेखन्यालिखेद्यंत्रमिदंवरं
१ साध्यसाधकयोर्नामपरस्परपरा
ङ्मुखं व्यतिक्रमाक्षरंचापियंत्रमध्येनि
वेशयेत् २ रंजिकाफट्समायुक्तामहि
षाश्वांतरंकृतं निंबवृक्षतलेन्यस्तंसप्ता
हाद्वेषकारकं २ इतिस्वरोद्ध्येविद्वेष
णविधिः काकविड्विषरक्तेनश्वेधू
जपटेशुभे कापिछकस्यलेखन्यालिखे
द्यंत्रंस्वरोदये॥१॥साध्यानामलिखेत्तत्रच
तुष्कोणेषुमध्यगं सविसर्गेणरवकारेण
तत्तुरीयेणरंजिका २ उष्ट्रीरुदक्तंयं
त्रंबद्ध काकगलेयतः सयंत्रंकासयेमु
खेततस्तूच्चाटनंभवेत् ३ इतियामलेउ
च्चाटनविधिः कालेनरोचनाचंद्रेलऽऽ
लुर्गजवारिभिः मदनोऽश्वलेखन्यायं
त्रंभूर्जेलिखेदिदं १ साध्यनामचतुरश्र
लीकाररंजिकान्वितं नराकृतिकृतंयंत्रंसि
क्थकेनचवेष्टयेत् २ त्रिमधुरैस्तापितंत
द्रक्तपुष्पैश्चपूजितं सप्तरात्रेणतद्यंत्रं
वशीकरणमुत्तमं २ इतियामलेवशीकर
णविधिः एवंसर्वेषुकार्येषुविधियुक्तंतुका
रयेत् यतस्तत्सिध्यतेयंत्रंसत्यंसत्यंनसंश
यः १ रुन्मंतंकालरात्रिंमहामारीगणा
धिपं भैरवंक्षेत्रपालंवफणींद्रगणना
यकं २ पताकायांलिखेदेतद्दक्षकंदर्व
रूचितं ततःसारतरंज्ञात्वाप्रथमंविस्त
राद्वदेत् ३ अरण्यफलहीसंग्रहीसंग्रही
नंशुभेदिने कन्याकर्तितसूत्रेणदिनेवस्त्रे
विनिर्मितं ४ सार्धहस्तत्रयंश्वेतंश्लेषंत

त्रयदापयेत् हरिद्रारुरितालेनरोलेयसंयु
तेनवा २ लिखेद्धनूमतोयंत्रंरूपंपंचघंटु
लमानकं दीर्घदंतकरालांगंदीर्घबाहुंन
खान्वितं ६ वामहस्तेध्वजंकुर्यादक्षिणेगे
रुपर्वतं बद्धक्रममहारोद्रंजिह्वालांगूल
लोलितं ७ रक्तवस्त्रंसकोपीनंशिरवा
मुकुटधारिणं हृत्पद्मेविन्यसेन्नस्यनिज
नाथस्यनामकं ८ हनूमतोलिखेन्नत्रमू
लमंत्रंदलाष्टके मात्रामंत्रेणतद्वाह्यस
व्यमार्गेणवेष्टयेत् ९ ॐ क्रांक्रींक्रूंक्रैंक्रौं
क्रः हनूमतोयंमूलमंत्रः ॐ वज्रकाय
वज्रतुंडकपिलपिंगलऊर्ध्वकेशमहाबल
पराक्रमरक्तमुखतडिज्जिह्वमहारोद्रदंष्ट्रो
त्कटकह २ नीलकपालिन्महादृढप्रहार
लंकेश्वरमहासेतुबंधनशैलवाहगगन
चरएह्येहिभगवत्सहस्रसूर्यसमानरूपश
त्रुमेरक्षांआज्ञापयंति एह्येहिदीर्घलांग
लमेअमुकंशत्रुंवेष्टय २ भंजय २ वरशरीरे
कुंभट्स्वाहा इतिमालामंत्रःसमाप्तः
गात्रेषुदापयेद्वैकैःश्चतुःषष्टिप्रमाणकैः
षड्वर्णोविन्यसेन्नाभिरसनाग्रेद्विरेखय
स्तंभनीमोहनीचैवरोधनीभंजनीतथा गा

त्रेषुदापयेद्वैकैश्चतुषष्टिप्रमाणकैःदेवीप्रणवा
दिनमोन्तगाः २ लकारंपत्रनेदद्यात्पुछदंडे
षुकारकं वुंकारमुखमध्यस्थंडुंकारवेतद्
यतः ३ वदनेमस्तकेगुह्यमूलमंत्रंन्यसेद्बुधः
लांगूलेमातृकोचापिक्षाक्षदिकान्यएवकी
कान् ४ मस्तकोपरिकर्तव्यामातृभिर्यहसं
युताः अष्टभांचश्चतुर्दिक्षुप्रतिष्ठाकारये
ततः ५ शुभर्क्षेचैवनक्षत्रेतारायंडबला
न्विते रक्तांबरधरोमंत्रीरक्तगंधानुलेप
नः ६ रक्तपुष्पकृतोटोपंसंपत्सन्नद्धविग्र
हः उद्धरेदक्षतैःपद्ममष्टपत्रंसुशोभनं, स्त
भनीमोहनीचैवरोधनीभंजनीतथा पू
र्वादितःश्चतुर्दिक्षुक्रमाद्देवीनिवेशयेत् ८
उड्डीयाणादिकांपीठंस्थापयेदीशकोण
तः भैरवीभैरवासिद्धिर्ग्रहानागोदिशाधि
पाः ९ प्रत्येकंक्रमयोगेनन्यसेत्तत्राष्टके
बुधः पूजाचैवक्रमेणैवकर्तव्याःस्वरमंड
ले १० नानाप्रकारशोभाढ्येकर्पूरागुरु
वासिते वंशोदयकृतोटोपेध्वजाष्टकविभू
षिते ११ मंडलस्यास्यमध्येतुकुर्यादूर्ध्वं
ततःपटं स्थापयेत्पंचगव्येनदर्प्पणोदर
मध्यगं १२ अग्निमारुतबीजेनविरध्या

दासनंतनः मूलमंत्रंन्यसेन्मूर्ध्निहनुदेवस्य
मातृकां १३ ॐ क्रौं हनुमतेनमः इतिमू
लमंत्रः अंगेषुविन्यसेदस्यषट्स्वरान्दीर्घ
संज्ञिकाद् ककारादिक्षकारांतान्नखांगु
ल्यादिषुविन्यसेत् १४ पंचोपचारैर्मिश्रैश्च
मधुमांसाशनैस्ततः पूजयेत्सकलान्देवा
न्प्रणवादिनमोंतगान् १५ पूजांकृत्वाविधा
नेनध्यानंकृत्वाविचक्षणः शोभनेत्रयोगे
णसिद्धोभवतिसर्वदा १६ विचित्रवस्त्रसंयुक्तं
बालाद्याभरणैर्युतं रक्तवस्त्रंमहाभीमंस
र्वलोकभयंकरं १७ ध्यानंलक्षंजपेत्तस्य मू
लमंत्रंनवाक्षरं मधाज्यरक्तपुष्पैश्च होमंक
त्वादशांशतः १८ कुमारीभोजयेत्तत्र च
तुःषष्टीःप्रमाणतः आचार्यदक्षिणांदत्वा
धान्यगरंग्रामरत्नकं १९ काष्ठपाषाण
धातूनांपूजायानिर्म्मितापिच प्रतिष्ठाक्रि
यतेतत्र देशेग्रामेपुरेपिच २० नदुर्भिक्षंभ
वेत्तत्रनव्याधिभयंभवेत् परचक्रागमो
नैव व्याधिभिश्चनपीड्यते २१ अस्यमंत्रंन्य
सेत्तत्र रक्तगंधानुलेपना रक्तगंधाक्षतार्चा
पमष्टपत्रसुशोभनं २२ स्तंभनीमोहनीचै
चरोधनीभंजनीतथा पूर्वादिक्षुचतुर्दि
क्षुक्रमादीक्षिनिवेशयेत् २३ अंजिको

दीनियापीठान्यातयेदीशकोणतः भैर
वीभैरवांसिद्धिंग्रहण्यादिषुसाधिपाः २४
प्रत्येकंक्रमयोगिन्यान्यसेत्तत्राष्टके पुनः
पूजाचक्रमेणैवकर्तव्या २५ पुष्पप्रका
रैश्चोटैःकर्पूरागरुशोणितैः वंशोद्य
कृताटोपैर्ध्वजाष्टकविभूषितैः २६ मंड
लस्यचमध्येतुकुर्याद्धूर्ध्वतनःपटं स्था
पयेत्पंचगव्येनदर्पणोदरमध्यगं २७
नतेपेत्यशनिस्तत्र नचरोधभयंभवेत्
डाकिनीभूतवेतालाःपिशाचोरगराक्ष
साः २८ हनूमंतप्रभावेनविषपीडान
जायते हनूमंतपताकेयंगजाश्वो
परिसंस्थिता २९ धारितास्मिप्रत्यये
नरिपुसैन्यस्यसंमुखी हनूमंतपता
केयंगजाश्वादीनूपराक्रमेत् ३० तस्या
दर्शनमात्रेणध्वजीभूतमानसौघाः
नश्यंतिरिपवस्तस्यसिंहस्येवयथामृगाः
३१ इतिस्वरोदयेहनुमंतपताका कृ
अभरक्षांप्रवक्ष्यामिसर्वसिद्धिप्रदा
प्यिकां स्तंभनीशत्रुसैन्यस्य भूभुजादि
वशंकरी १ रोचनाकुंकुमाभ्यांच
भूर्जपत्रेसुशोभने लिखित्वादित्यं

मंत्रंभूर्जपत्रेसुशोभने २ सुवर्णमयलेख
न्यायंत्रमष्टदलंलिखेत् सिद्धिनामचतस्म
ध्येमूलमंत्रोदलाष्टके ३ मालामंत्रश्चत
र्व्हाह्येत्रिधाऊंकारवेष्टितं त्रिलाहवेष्टितं
कृत्वाकटिबाहुशिरस्थितं ४ धारयेद्य
स्यिमारक्षांतस्यविघ्नंनजायते रणेराज
कुलेद्यूतेव्यवहारेपराजये ५ शस्त्रेनक्रम
तेतस्यवज्रदेहोमहाबलः उपसर्गादिदो
षेषुविषेस्थावरजंगमे ६ नभयंविद्यते
तस्यस्त्रीणांचैवातिवल्लभः तस्यपीडांन
कुर्वंतिग्रहाश्चैवमुपग्रहाः ७ नतेषांदु
ष्कृतंकिंचिन्नभयंतस्यविद्यते जालंया
ग्निभयंनास्तिव्याघ्रतस्करजंभयं ८
ज्वराःसर्वेप्रणश्यंतित्र्याह्निकाद्याविशेष
तः इयंहनूमतोरक्षासर्वोपद्रवनाशिनी
९ इतिस्वरोदयेहनूमतोरक्षाविधिः छ्
पिछकारंपटरुत्वा पताकांचविधानतः
चंद्रार्कग्रहणेप्राप्तेहनूमंतंलिखेन्नतः १
मातृकायाजपेन्नत्रयावत्मुक्तिःप्रजायते
होमयेच्चदशांशेनतिलसर्षपकादिभिः २
युद्धकालेचतत्पिछंजांगेष्वोपरिसंस्थि
तं दर्शितंशत्रुसैन्यस्यभंगोभवतिनि
श्चितं ३ इतियामलेहनूमत्पिछिकाविधिः
मदनेनहनूंरुत्वापूर्वलक्षणलक्षितं व
र्तितश्वेतलांगूलंकारयेत्साधकोवरः ४
परचक्रस्ययंमुख्यालांगूलस्थानुका
रिणः गजाश्वरथयानानिवहिस्था
नितुकारयेत् २ पूर्वमंत्राक्षरैर्मेधलो
मूलेनतुवेष्टयेत् वेष्टयेत्प्रतिमांसर्वा
मापातंदेलमूर्त्तेकोर्ध्वजानु ३ स्थाप
येत्पूर्वविधिनापरचक्रस्यसन्मुखं
दर्शनात्परचक्रस्यभंगमायातितत्क्ष
णात् ४ अथवाहोमयेत्तत्रलांगलीव
रणंविषं राजिकांतुषकेशास्थिधूषणं
निंबमेव च ५ षट्कोणंकुंडमध्येतुनि
बाक्षचित्रकोद्भवाः समिधोज्वालयेत्
त्रेनेरुत्पात्तिमुखास्थितः ६ होमयेद्ध
नुमंत्रेणसहस्रैकंदिनेदिने दिनेसप्त
कमध्येतुशत्रुपीडातत्रोभवेत्तुत् ७ भ
गहोममहापीडाविस्फोटगंडलूनिका
म्रियतेनात्रसंदेहोःसंग्रामंकुरुतेय
दि ८ इतिस्वरोदयेहोमहनूमद्धनं
त्रहोमविधिः मालामंत्रंपठेद्यस्तु
हनूमंत्रेणांगणे तस्योगंवज्रवद्यु

देहतुल्यपराक्रमं पुनरन्यंप्रवक्ष्यामिवै
धंपरमदुर्लभं मांस्टंकमनोविरव्यातंस
र्वशास्त्रेषुगोपितं २ आनयेन्निर्व्रणंशु
द्धंभूर्जपत्रंसुशोभनं तस्मिंस्तक्षरवरच
क्रेणवामवर्णंभवेन्नतु ३ चितांगारवि
धेर्युक्तंकृत्वोन्मत्तरसेनचु कुलिकेवि
लिखेधंत्रंनैर्ऋत्याभिमुखेस्थितः ४
प्रेतवस्त्रांतयन्मासुक्केशंविवस्त्रकं
योद्वासुधाकृतियंत्रंकृत्वामध्येरिनामकं
५ तन्नामैरवयाभिंधात्कोपाविष्टस्तु
साधकः पिंडयित्वातुतंयंत्रंशत्रूरस्य
मुखेक्षिपेत् ६ कीलयेत्सुष्टलोहेनश
ल्यकांडुमयेनवा आनयेदारनालेन
सप्तगोक्षुरंततः ७ तन्मध्येदुर्दुरंक्षिप्त्वा
तच्छांडंमुद्रयेत्ततः तापयेद्धुद्धकालेतु
पिचितांगारनलोपरि ८ गात्रस्तंभोमन
स्तंभोवायुपीडातथोदरे म्रियतेऽरिर्नसं
देहोयद्विंशक्रसमोरणे ९ इति
स्वरोदयेमंडूकयंत्रविधिः शिलाता
लहरिद्वांशिरेकर्कपत्रमुखेलिखेत् को
किलाक्षस्यलेखन्यास्तंभांतरिपुना
मकं १ त्रिठकारैःसमावेष्टयतद्बाह्ये
पार्थिवंपुरं वज्रमष्टसमोपेतंरेखा
षोडशरक्षितं २ मायाबीजेनसंवेष्ट्यत्रि
धांकु२ंनिरोधितं तद्यंत्रंयोजयित्वातुकं
टकैःकीलयेत्ततः ३ क्षिपेद्वल्मीकमध्येतु
पाषाणैस्तंत्रपूरयेत् पश्चिमसारमेघु
द्वंविवादंसाध्यसाधकः ४ गात्रस्तंभोभ
वेदेवैसाध्योसौजायतेऽर्कं मेनस्तंभस्त
थैवचेविंधास्तंभोविवादेचे ५ इतिस्व
रोदयेस्तंभयंत्रविधिः ६ अर्कपत्रयुगे
नाग्नितांगारेणलेखयेत् पूर्ववत्कीलये
त्पश्चाछिलयाछादयेद्दृढं २ एतद्यंत्रप्रभा
वेनमनोभंगोभवेत्सुनः अथप्रविशतिसं
ग्रामेम्रियतेऽरिर्नसंशयः २ इतिस्वरोद
येशत्रुभंगयंत्रविधिः ६ आर्तनामोद्
रेकृत्वाफीकारंफेरेसंपुटंतं नादबिंदुस
मायुक्तमोंकारसंपुटेस्थितं १ दिक्षुवज्रा
ष्टसंभिन्नषोडशस्वरवेष्टितं वज्राग्रेषु
चसर्वेषुमूलमंत्रंयथेप्सितं २ आदिबीजो
द्धरेनामदत्वानस्यपरिस्फुरं लिखित्वावे
ष्टितंसर्वान्मायथावेष्टितंत्रिधा ३ कलि
ऋंडलदंडाख्यंयंत्रंविघ्नविनाशनं श्वेतां
बरधरोमंत्रीशुभध्यानपरायणः ४ उ

स्य त्तराभिमुखोभूत्वालिखेद्यंत्रंशुभोदये कां
९० स्यभाजनमध्येतु चंदनेनसुगंधिना ५
लिखेद्भूर्भस्यलेखन्यामुष्टित्रयप्रमाणतः
सुगंधिकुसुमैश्चैतैरष्टोत्तरशतेनच ६ अ
र्चयेद्विधिवद्यंत्रंफलंयावद्दिनेदिने लि
खितंपूजितंतत्तु प्रक्षालयजलेनतु ७
न जैऊलंपीतमात्रंतु परविषाविनाशनं
शाकिनीभूतवेतालाःपिशाचोरगराक्ष
सा ८ भवंतिनिष्प्रभाःसर्वेयंत्रस्यास्य
प्रभावतः शूलंविषंसिकाजीर्णंलूताविस्फोटकादयः ९ अभिचारकृतोदोषो
विषंस्थावरजंगमं गर्भश्चवेदनायस्या
मूदोगर्भस्तुयोभवेत् १० एवंरोगारुदो
षार्ताःस्यस्थास्युसर्वजंतवः वंध्यापिलभा
तेपुत्रंमृतवत्साजीवत्सुता १२ दुर्भगासु
भगात्वेवयंत्रस्यास्यप्रभावतः कृत्साः
प्रभ्रमंत्यंतिमारुश्लेष्मपित्तिकाः १२ जी
र्णज्वराश्चविषमाःशीतदाहज्वरात्मकाः
एवमप्यास्थितेयंत्रंकरोतिविपुलांश्रियं
१३ इतिस्त्रीस्वरोदयेकलिकुंडलयंत्रंकृ
विधिः २ शांत्यर्थंनिजनार्थस्यजयार्थं

रणकंकपां १ यंत्रंमृत्युंजयेनामत्रस्या
मिसमासतः हंसम ध्यगतंना
मृत्युंजयपुटीकृतं रक्षरक्ष
समायुक्तंबाह्येरेखत्रयावृतं २
त्रिवर्गस्यतृतीयोयोबिंदुषट्स्वरभूषितः
स्वाहाद्याःसविसर्गाश्च-र्गाश्चमंत्रोयंप्र
णवादिकः ३ पद्ममष्टदलंत्रात्रेअंभा
द्याष्टदलेस्थिताः विदिक्षुप्रणवं
तस्ययंत्रेषोडशकंबहिः ४ स्वराःषोड
शदातव्याःप्रत्येकंसर्वतोदिशि द्वाविंश
त्यत्रकंपद्मंतद्बाह्यनियेशयेत् ५ का
दिमुक्तोहसोवर्णैस्थापयेत्क्रमशस्त
तः चतुःषष्टिदलंबाह्येभैरवाद्यंततोलि
खेत् ६ भैरवीभैरवासिद्धिर्ग्रहोनामाद्यिशा
धिपः पीठोपपीठसंयुक्ताःक्षेत्रपालादि
शाष्टकं ७ आनयेन्निर्व्रणंभूर्जंग्रंथिहीनंसुशोभनं वर्णभेदेनसंगृह्यब्राह्मणा
दिक्रमेणच ८ ककारत्रय २ इद्य
मोंकारस्यत्रयेणच फटसयंयंत्रमा
लिख्यसिद्धनामसमन्वितं ९ सुवर्ण
मयलेखन्याउत्तराभिमुखंनिशं

स्व ९१ देवारेलिरवेघत्रंमृत्युंजयविधानकं २०
अनेनमद ... नस्थेनकृत्वालिंगंसु
शोभनं २१ पंथामृतेनगव्येनस्ना
पयेत्सप्तवासरान् २२ पश्चाच्चभक्तकंदे
यंलक्षैकमयुतंततः १२ साध्यनामयुतं
मंत्रैरक्षार्थमुद्धरेत्ततः पूजयेद्धेतपुष्पै
स्तुकर्पूरागुरुचंदनैः १२ छादयेत्सरव
स्त्रेणासप्ताहाद्धातिकंभवेत् १३ मधा
ज्यंगुग्गुलंतालीश्रीपर्णैःसितसर्षपैः प
द्माकारेणकुंडेनहोमोदशांशतः २४
न्नामीदूर्वासमिद्भिश्चकुडाद्गभिमुखस्तथा
मुशंचरवेचरीन्ध्वास्वाहांतंहोमयेत्ततः १५
मुच्यंतेरोगिणोरोगात्सापात्सापाद्विमो
क्षितः त्यक्तीपीडांग्रहाःक्रूराःसौम्यतांयांति
नान्यथा १६ शाकिनीभूतवेतालाःपि
शाचोरगराक्षसाः ज्वरास्तस्यप्रणश्यं
तित्र्याह्निकैकांतरादिकाः १७ विषंनक्र
मतेदेहेस्थावरंचाथजंगमं उपविषा
णिसर्वाणिनिर्विषाणिभवंतिध्रुवं च अ
भिचारकृतादोषायेकेचिद्यत्रभूतले ते
सर्वेपिक्षयंयांतिवर्षाविक्रिगतायथा १९
वैरिणोमित्रतांयांतिप्रसादंकुरुतेप्रभुः

स्व ९२ अवश्यंवश्यतांयांतिप्रसादंकुरुतेप्रभुः
राजस्त्रीक्षद्भ्रकःजंतवः २० युद्धकाले
कृतंयंत्रंविधिनानेनभूपतिः अवश्यिला
विशेद्युद्धेचिदरीरपिदुर्जयः २१ राज्याद्भ्र
ष्टोलभेद्राज्यंषण्मासस्यप्रयोगतः अ
पुत्रोलभतेपुत्रंदुर्भगासुभगर्भगासुभ
गाभवेत् २२ ग्रीवाबाकुशिरःकथांधार
यंतिचयेनराः कृत्वारक्षामिदंयंत्रंमृत्यु
स्तेषांनविद्यते २३ इदंमृत्युंजययंत्रंवि
ध्नमृत्युविनाशनं अत्रकार्यंमयारब्धा
तंलोकानांहितकाम्यया २४ किंपुनर्ब
हुनोक्तेनप्रभावेनप्रयोजनम् एतद्यंत्र
कृतारक्षात्रैलोक्यंवशमानयेत् २५ उद्धा
नेचनदीतीरेशुभदेशेशुभेदिने कृतेशा
स्त्रकर्त्तरेकालेतल्लिंगंनिक्षिपेद्भुवि ३७
सार्वकामिकयंत्रेषुसिद्धिर्भवतिनान्यथा
छ इतिनरपतिजयचर्यायांयामलीय
स्वरोदयेमृत्युंजयनामयंत्रविधिः छ
समाप्तोयंस्वरोदयग्रंथः छ छ
शके १८५७ राक्षसनामसंवत्सरेपौषशु
क्लत्रयोदश्यांचिन्नपूर्णनगरस्थविनायक
दैवज्ञिरालिखितोयंग्रंथः छ छ छ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

MEMORIAL

लिकं पञ्चाद्दिलोकमेनोवस्वक्षेवीचान्यभे
स्थितो ११ चंद्रक्षेत्रयराकेंदू तदास्तिनिधि
तेनिधिः भानुक्षेस्थितोतोवे तदाशल्मं
चनाऽन्यथा १२ स्वस्वभेदूतयंत्रेयंनास्ति
किंचिद्विपर्यये स्थितंनलभ्यतेद्व्यंचंद्रेकू
रग्रहान्विते १३ दुष्टेचंद्रभवेन्मुद्राखीस्त्रेचं
द्रेल्पकोनिधिः ग्रहदृष्टिवशात्सोपिविज्ञे
यानवधावुधैः १४ हेमतारंयतास्त्रारंपाषा
णंन्नमयापसी सूर्यादिगृहगेचंद्रेद्व्यक्षां
डप्रजायते १५ भुक्तराश्यंशमानेनभूमा
नंकांविकैःकरैः नीचेद्विध्वंपरेनीचेजल
स्थोसोभवेन्निधिः १६ शुभक्षेत्रगतेचं
द्रेलाभस्यान्नत्रसंशयः पापक्षेत्रेनलाभो
विज्ञेयःखरपागः ७ हेमतारंयतास्त्रारं

श्रीहरिर्जयति॥ यस्योदयेनेहजगत्प्रबुध्यतेप
वर्तनेचाखिलकर्मसिद्धिये॥ ब्रह्मेंद्रनारायणरुद्र
वंदितः सनःसदायच्छतुमंगळंरविः॥ध्रु॥
श्रीगुरुर्जयति॥ श्रीमंगलमूर्तिर्जयति॥
ॐसंस्तूयंतेसुमनसोयंस्मात्तमस्मयै
दंतावरेणाश्चमनुः॥श्रियंदधानाह
देवेभुशत्रवःपराजितास्तोअपनिलं
यंतां॥१॥सादात्सर्वेषांपरंपरासर्वेषां